**281a.** Foll. 18; size $9\frac{3}{4}$ in. by 3 in.; fairly written, in the Devanāgarī character, about A.D. 1500; six or seven lines in a page.

*Agnishṭoma-Maitrāvaruṇa*, a manual of the formulas and prayers used by the *Maitrāvaruṇa* priest at the *Agnishṭoma* sacrifice. Not accented.

It begins: **अथाग्निष्टोममैत्रावरुणं लिख्यते । वृतो जपति ॥ महन्मे वोचो भर्गो मे वोचो भगो मे वोचो यशो मे वोचः स्तोमं मे वोचस्तृप्तिं मे वोचः कॢप्तिं मे वोचो०**

It ends: **उपहूतस्योपहूतो भक्षयामि ॥ इति अग्निष्टोममैत्रावरुणं समाप्तं ॥** [H. T. COLEBROOKE.]

## 422.

**3009b.** Foll. 37; folio, size 13 in. by 8 in.; well written, in the Devanāgarī character, on European paper (water-mark 1853); fifteen lines in a page.

*Agnishṭoma-mantramālā*, a collection of (unaccented) *mantras* used by the *Adhvaryu* during the performance of the *Agnishṭoma.*

It begins:

**अग्निष्टोममन्त्रमाला लिख्यते ॥ विच्छिन्नसोमपीथसंधानार्थमैंद्राग्नं पशुं दौर्ब्राह्मण्यपरिहारार्थमाश्विनं च पशुमग्नीषोमीयेण पशुना समानतंत्रं कुर्वन्द्वादशस्तोत्रेण द्वादशशस्त्रेण सप्तवर्येण रथंतरसाम्ना एकविंशतिशतगुदक्षिणेन ज्योतिष्टोमेनाग्निष्टोमसंस्थेन चतुष्टोमेन स्वर्गकामः सोमेन यक्ष्ये ॥ त्रिरुपांशु त्रिरुच्चैः॥ अयं ते योनिः ॥ मनो ज्योति० स्वाहा ॥ एदमगन्म देवयजनं पृथिव्या विश्वे देवा यदजुषंत पूर्वं ऋक्सामाभ्यां यजुषा संतरंतो रायस्पोषेण समिषा मदेम** [Taitt. S. I. 2, 2, 3] **॥ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मंत्रकृद्भ्यो०** [T. Ār. IV. 1 and 2] **परिष्टुतिः स्वाहा ॥ सवित्र इदं० । देवस्य त्वा स० ददे ॥ अभिरसि नारिरस्यध्वरकृद्देवेभ्यः ॥०**

It ends:

**अध्वया वरं ते ददामि ॥ यज्ञविमोकादि ब्राह्मणतर्पणांतं ॥ ब्राह्मणतर्पणं १००० ॥ अयं ते यो० गिरः ॥ मनो ज्योति० तेन स्वाहा ॥ मनसे ज्योतिष इदं ॥ उदवसानीयस्थाने सप्रवत्या पूर्णाहुतिं ॥ वरं च ॥ इत्यग्निष्टोममंत्राः समाप्ताः ॥**

## 423.

**1617a.** Foll. 9; size 7 in. by 5 in.; fairly written, in Devanāgarī, about the beginning of the 17th century; seven lines in a page.

*Prastotṛisāma* (*-paddhati*), being a manual of the *Agnishṭoma* (and *Ukthya*), for the use of the *Prastotṛi.*

It begins: **दीक्षणीयायां तार्क्ष्यसामनी गायेत्यमूष्विति तार्क्ष्य ऋषिः त्रिष्टुप् छंदः इंद्रो देवता । दीक्षणीयायां सामगाने विनियोगः । त्यमू षू ।०**

It consists of two parts, the first, foll. 1–6*a* (ending **इति प्रस्तोतृसाम**), containing directions and formulas regarding the several *ishṭis*, from the *Dīkshaṇīyā* to the *Udavasānīyā*; while the second part (apparently in a different handwriting) gives the texts of the *stotras*, viz., the first *prapāṭhaka* of the *Uttarārcika*.

The texts are figured for chanting, with the exception of the last two leaves.

[H. T. COLEBROOKE.]

## 424.

**1729E.** Foll. 4; size $8\frac{3}{4}$ in. by $3\frac{3}{4}$ in.; legibly written, in Devanāgarī; ten or eleven lines in a page. Modern.

*Agnishṭoma-Stomayoga*; a manual of rules and formulas (not accented) regarding the introduction of chants (*stomayoga*) at the *Agnishṭoma* sacrifice.

The MS. begins: **ज्योतिष्टोमाग्निष्टोमसंस्थस्य स्तोमयोगो लिख्यते ॥ अथ बहिष्पवमानस्य स्तोमयोगः । ाग्निस्तेजसेंद्रस्य** °

It ends: **इति अग्निष्टोमस्य स्तोमयोगः समाप्तः ॥** after which two lines beginning **प्रतिग्रहमंत्रः ।** देवस्य त्वः **सवितः** °

[H. T. COLEBROOKE.]

## 425.

**3009k.** Foll. 14; size 13 in. by 8 in.; well written, in Devanāgarī; European paper; fifteen lines in a page.

*Agnishṭoma-Yajamāna* (*paddhati*), a manual of the *Agnishṭoma*, for the use of the sacrificer (*Yajamāna*).

It begins: **सोमेन यक्ष्यमाणः पूर्वेद्युर्वृद्धिशांतिप्रतिसरवंधान्विधाय प्रातरग्निहोत्रं हुत्वा ॥ ऋत्विग्भिः सह स्नानादिपंचक विधाय** °

It ends: **आ २३४५ तंतवे मा ज्योतिषा ३ मुकशर्मन्नु मा तनुहि ज्योतिषा ॥ इति अग्निष्टोमयजमान समाप्तः ॥ शके १७९३ ॥** ° (?)

## 426.

**1729C.** Foll. 11; size $8\frac{3}{4}$ in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī, about A.D. 1600; 7–9 lines in a page.

*Audgātra*, a manual of the *Ukthya* and *Atirātra* texts, figured.

It begins: **अथ उक्थ्येतिरात्र औद्गात्रं लिख्यते ॥ पवस्व वाचो** °

It ends: **इत्यातिरात्र औद्गातृत्वं समाप्तं ।** ° **। इदं पायसविश्वनाथभट्टात्मजनृसिंहेन लिखितं ॥**

## 427.

**91B.** Foll. 53, one of which (fol. 37) is missing; Devanāgarī character; indifferent handwriting; eleven lines in a page.

The *Vājapeya* chapter of a sacrificial manual, entitled *Karmapradīpikā*, by *Rāmacandra*; apparently for the use of the Brahman priest. The texts are not accented. It begins:

> **विद्याकरगुरून्नत्वा सर्वविद्याकराग्रिणः ।**
> **रामः पद्धतिमाधत्ते वाजपेयक्रतोर्विधौ ॥**

**तत्र वाजपेयं त्रिधा सामगाः पद्धतिकारा आमनन्ति । तत्र प्रथमं संस्थावाजपेयं । तस्य सर्वो विधिर्वक्ष्यमाणवाजपेयवशदक्षिणासु विशेषः । गवां शतं द्वादशोत्तरशतं वा** ° – – **॥ द्वितीयः कुरुवाजपेयः सामगाचार्यैरेवोच्यते । तस्य सर्वोऽपि विद्यन्तो** (? **विध्यन्तो**) **मुख्यवक्ष्यमाणक्रतुवाजपेयवत् । दक्षिणास्तु सप्तदशैव गावः** ° – – **॥ अपरो वाजपेयः शरद्यवैश्यस्येति कात्यायनेन दर्शितो मुख्यः क्रतुविशेषरूपः । तस्य प्रयोग उच्यते । तस्य शरदि पूर्णिमायां सुत्या । ब्राह्मणक्षत्रियावधिकारिणौ न वैश्यः । संस्थावाजपेये तु वैश्यो प्यधिकारी । वाजपेयस्य षोडशिविकारत्वं । षोडशिनि च मैत्रायणीयकश्रुतौ चयननिषेधः ।** °

**इति प्रातःसवनं समाप्तं ।** fol. 8*b*; ° **माध्यंदिनं** fol. 10*b*; **इति समाप्तो वृहस्पतिसवयज्ञो वाजपेयांगभूत एकाहो ऽग्निष्टोमसंस्थ वृत ॥ वत्सस्यास्ते महर्षेः प्रवरतरकुले सर्वविद्याविदग्धः सद्बुद्धिः** <u>**शैवदासो**</u> – – (*lacuna*) – – **याज्ञिकः** <u>**सूर्यदासः**</u> **। तत्सूनु** (!) <u>**रामचंद्रः**</u> **स्वमतिविलसितेनादधात्रेमिषस्थो वैलाशाख्येय एतां सरणिमृजुतमामंगिरःसूनुयागे ॥ अथ वाजपेयः ॥ तस्य कात्यायनः सप्तदश दीक्षा आह ।** ° fol. 16*b*; **इति प्रातःसवनं** fol. 28; ° **माध्यंदिनं सवनं** fol. 40.

It ends:

> **लाट्यायनाश्वलाय(न)कात्यायनकलितकर्मसंकलनात् ।**
> **रामस्तृतीयसवने पद्धतिमिति कर्मदीपिकामधात् ॥** – – **॥**

**इति सम्राट्स्थपत्यग्निचित्सूर्यदासात्मजस्य विशालाक्षीसूनो रामचंद्रवाजपेयिनः कृतौ कर्मप्रदीपिकायां पद्धतौ वाजपेयक्रतुः समाप्तिमगात् ॥** ° **॥ संवत् १६०१** ° [H. T. COLEBROOKE.]

## 428.

**1254d.** Foll. 20; size 9¼ in. by 4¼ in.; Devanāgarī character; indifferent handwriting; 10–12 lines in a page.

A manual of the *Vājapeya* and *Aptoryāma* chants and (*Udgātṛi*) formulas, by *Rāmakṛishṇa Nānābhāī*, son of *Dāmodara*. Not figured.

Fol. 1*a* contains the last five lines of one section; ending इति क्रत्वंतरे वाजपेयः समाप्तः ॥ ० ॥

Fol. 1*b*: अथ कुह्ववाजपेय उच्यते ॥ पूर्वोक्तवाजपेये सप्तदशैव गावो दक्षिणा दीयंते । ०

Fol. 2: इति श्रीत्रिपाठीदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृता वाजपेयपद्धतिः समाप्ता ॥ अथाप्तोर्याम उच्यते ॥ तत्र महन्मे वोच इत्यादि ०

Fol. 16*b*: इति० कृताप्तोर्यामपद्धतिः समाप्ता ॥ अथाग्निचित्यस्य क्रतोर्विशेष उच्यते ।०

It ends: इत्यतिरात्रः समाप्तः ॥ संवत् १८०७ आश्विनकृष्ण १३ रवौ संपूर्णमगमत् । [H. T. COLEBROOKE.]

## 429.

**1748b.** Foll. 5; size 8¼ in. by 3¾ in.; fairly written, in Devanāgarī, in the early part of last century; the last two leaves by a different hand, in red ink.

*Vājapeyārcika*, another manual of the *Vājapeya* chants. Figured.

It begins:

वाजपेयार्चिकं लिख्यते ॥ उपास्मै गायता नरः ०

It ends: इति वाजपेयसाम ॥ इति वाजपेयार्चिकानि ॥

[H. T. COLEBROOKE.]

## 430.

**1254a.** Foll. 62; size 9¼ in. by 4¼ in.; Devanāgarī character; indifferent handwriting; nine or ten lines in a page.

*Samūḍha-Pauṇḍarīka-paddhati*, a manual of *mantras* and *stotras*, figured for chanting, at the eleven days' Soma sacrifice, called *Pauṇḍarīka*; by *Rāmakṛishṇa Nānābhāī*, son of *Dāmodara*.

It begins: समूढः पौंडरिको लिख्यते ॥ पुरस्ताज्जपः ॥ स्तोमयोगः ॥ अग्नेस्तेजसेत्यादि ॥ अन्नं करिष्यामि ॥ उपास्मा । उपो षु जा । पवमानस्य ते कव इति बहिष्पवमानं पुष्कल ऋषिः । ०

It ends: इति विश्वजिदतिरात्रः समाप्तः ॥ इति श्रीत्रिपाठीदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृता विश्वजिदतिरात्रस्य समूढपौंडरिकस्य पद्धतिः ॥ अनेन प्रीयतां देवो भगवान्मंगलेश्वरः । लक्ष्मी नृसिंह पूर्वेषामस्माकं कुलदैवतं ॥

संवत् १८११ मितिमार्गशीर्षशुक्ल ५ भौमवासरे लिखितमिदं द्रोणोपनामकभैरवभट्टानुजविष्णुभट्टात्मजभाईरामेण लिखितम् ॥

[H. T. COLEBROOKE.]

## 431.

**2394a & b.** Foll. 18 and 93; size 10½ in. by 4½ in.; Devanāgarī character; fairly written, about A.D. 1730, by the same hand as the next MS.; 8–10 lines in a page.

The same manual (*Pauṇḍarīkaprayoga*); not figured. The matter contained on fol. 18 is repeated on the next leaf, with which a new paging begins. It ends:

इति दशममहः ॥ अथ एकादशमहः ॥ विश्वजिदतिरात्रः ॥ उप त्वा जामयो गिरोम् ॥ ओं दायि दिशतीहिंष्कर्ता २ वायोरनीके आ १२१२ स्थायिरो आ ३४५ ॥ १ ॥ जनींतो नुग्रवोम् ॥ ओं पूत्रोयंतः सुदानावा २ सरखंत॰ इ वा १२१२ हुं · मा हो । आ · ॥ २ ॥ उत नः प्रिया प्रियासोम् ॥ ओ॰ सामसुव ॥ after which, by a later hand, इति ० ॥ and in the margin सामवेदद्वादशाहप्रयोगयु०

[H. T. COLEBROOKE.]

## 432.

**2394c.** Foll. 118; the same size and handwriting.

*Vyūḍhāhīna-dvādaśāha-prayoga*; a manual of *mantras* and *stotras* used by the *Sāman* priests

at the (*ahīna*) *Dvādaśāha*, with transposed metres; not figured. It begins:

अथ व्यूढाहीनद्वादशाहस्य प्रयोग उच्यते ॥ तत्र महन्मे वोच इत्यादिरभिदाधानांतो विधिः सर्वो पि भवति । विशेषस्तूच्यते ॥ तस्य द्वादश दीक्षा द्वादशोपसदो द्वादश प्रसुतः षट्त्रिंशदेता रात्रयो भवंति । ०

It ends: इति द्वादशाहस्य व्यूढाहीनस्य स्तोत्राणि समाप्तानि ॥ इति द्वादशाहस्य प्रयोगः समाप्तः ॥ ० ॥

संवत् १७८६ भाद्रवाशुदि १३ भौमवारतद्दिने समाप्तं ॥ ० ॥ लिखितं वाराणसिमध्ये भटपुरुषोत्तमेन शिवो जयः ॥

[H. T. COLEBROOKE.]

## 433.

**1671b.** Foll. 106; size 9 in. by 3¾ in.; fairly written, in Devanāgarī; nine lines in a page.

The same manual; figured for chanting. Not quite complete at the end. Dated संवत् १७८३ (? १५९३) मितिकार्तिकशुद्ध १० गुरौ ०

[H. T. COLEBROOKE.]

## 434.

**1729D.** Foll. 55; size 8¾ in. by 3¾ in.; fairly written, in Devanāgarī; ten lines in a page.

*Bṛihatī-śastra*, or "Great recitation" (also called *Mahad-uktha*); being the principal (*Nishkevalya*) *Śastra* on the *Mahāvrata* day of sacrificial sessions. Not accented.

The MS. begins:

बृहतीसहस्रं ॥ हुम् भूर्भुवः स्वरोमध्वर्यो शोंसावों वाक् । इति जपतिः । तदिदास भुवनेषु ज्येष्ठं पु नदं व ओदतीनां । यतो जज्ञ उग्रस्त्वेषनृम्णो रु नदं व्योयुवतीनां सद्यो जज्ञानो नि रिणाति शत्रून्पतिं वो अघ्न्यानां । अनु यं विश्वे मदंत्यूमाः पो धेनूनामिषुध्यसों वि: । ध्यसों वावृधानः शवसा भूयोजा नदं व ओदतीनां । ० See *Rgv.* x. 120, 1 *seq.* and viii. 69, 2.

It ends: इति बृहतीशस्त्रं समाप्तं । अंबिकार्पणमस्तु । संवत् १५९२ फाल्गुनशुद्ध १० भौमे लिखितं विश्वनाथमेगदेवपरोपकारार्थं -- (blotted out) -- नागेश्वरसन्निधौ संपूर्णमस्तु ॥

[H. T. COLEBROOKE.]

## 435.

**599c.** Foll. 10; size 9¼ in. by 4 in.; legibly written, in Devanāgarī, about the middle of the 17th century; 12 lines in a page.

*Sarvatomukha-prayoga*, a manual of a special form of Soma sacrifice; chiefly in accordance with the *Baudhāyana* ritual.

It begins:

अथातः सर्वतोमुखं व्याख्यास्यामश्चिन्वीत सर्वतोमुखे ऽग्निमिति बौधायनो न चिन्वीतेति शालीकिरत्रो ह स्माह मौद्गल्यः पूर्वस्मिन्नेवाग्निचय इतरेषु सावित्राः स्युरित्येतदपि न कुर्यादित्यांगिरसविरत्रयोः समारोपण इति सूत्रमाचार्ययोरत्रो ह स्माह गौतमो गृहपतिरेव प्रथममरण्योः समारोपयेतत्र इतरे सत्रेण इति शालाया इति प्राकृतेन प्रक्रमेण मियान्मध्ये गार्हपत्य इति सूत्रं बौधायनस्यात्रो ह स्माह शालीकिस्त्रिपदेन प्रक्रमेण सर्वत इति त्रिवृत्प्राच्यां दिशि भवति पंचदशो दक्षिणतः सप्तदशः पश्चादेकविंश उत्तरतः सर्वतो वा ज्योतिष्टोमाः सर्वे ज्योतिष्टोमदक्षिणा इति प्रवर्ग्यस्य करण इति नोक्ष्ये प्रयुंज्यादिति शालीकियाजमान इति कुर्याद्यथावकाशं याजमानमित्यत्रो ह स्माह शालीकिर्ये ऽग्निसंस्कारार्थाः स्युस्तान्काममितरत्रैवेणेत्यग्न्यन्वाधान इति सूत्रं बौधायनस्यात्रो ह स्माह शालीकिर्गार्हपत्यः सकृदन्वाहितः स्यात्तं सकृदन्वाधाय ततो यथार्थं गच्छेद्भक्षण इति सूत्रं बौधायनस्य सर्वं समवधाय सकृदेव भक्षयेदिति शालीकिर्मार्जन इति सत्रं मौद्गल्यस्य सकृदेकस्मिन्निति शालीकिः लोकाग्नीनां हरण इति सूत्रमाचार्ययोरत्रो ह स्माह दीपवात्स्यः पूर्वस्मिन्नेव याजमानं स्यादिति शालीकिः क्रतुपशूनां करण इति सूत्रं बौधायनस्य क्रतुपशव ऐकादशिनाश्च विकल्पंत इति शालीकिः समंजन इति सूत्रमौपमन्यवीपुत्रस्य यावंतः स्तोमास्तावत्कृत्वः प्रचरण्या समनक्तीति शालीकिः दधिग्रह इति सूत्रं मौद्गल्यस्य पयसा वाज्येन वेति पूर्वः कल्पो बौधायनस्योत्तरः शालीकेरंश्वदाभ्ययोर्ग्रहण इति सूत्रमौपमन्यवस्यात्रो ह स्माह शालीकिर्वाजपेये द्वादशाहे सत्रे तांडिनापत्ते उद्भिदि बलभिदि लभ्येदिति मुक्तिपिमतिसाध्यानामित्येवमेव पृश्निग्रहैः प्राणग्रहैरिति षोडशिग्रहणाग्रहण

इति सूत्र बौधायनस्यानुसवनं गृह्णीयुरिति शालीकिरतिग्राह्याणां होम इति सूत्रं शालीकेर्माहेंद्रस्यानुवषट्कारमुपजुहुयुरित्यौपमन्यवः षोडशिनः स्तोत्रमुपाकरोतीति सूत्रं बौधायनस्य येन केनचिदिति शालीकिर्हृदयशूलानामुद्वासन इत्येकैकश उद्वासयेदिति बौधायनः सर्वान्सहेति शालीकिरवभृथ इति सूत्रं शालीकेः प्रांच एवावभृथमभ्यवेयुरि[ति] गौतमो ऽरण्योः समारोपण इति सूत्रं शालीकेरत्रो ह स्माह बौधायनो गृहपतिरेवारण्योः समारोपयेत्तत इतरे यथार्थं गच्छेयुः ॥ ॥ सर्वतोमुखस्य प्रयोगो वक्ष्यते ॥ यः कामयेत सर्वात्मतामवाप्तुं स सर्वतोमुखेन यजेतानपजय्यकामो वा चतुर्मुखां शालां कृत्वा मध्ये गार्हपत्यः प्रतिदिशं दक्षिणाग्न्यादयः सर्वत्र दक्षिणपार्श्वे दक्षिणाग्न्युपरवमार्जालीयादयः वामपार्श्वे आग्नीध्रीयचात्वालोत्करादयः एवं विहारं कल्पयित्वा एका दीक्षा तिस्रो वा पौर्णमास्याः पूर्वं यथा संभवेत तथा । तस्यां सुत्या भवति तथा दीक्षा कर्तव्या । त्रिवृत्प्राच्यां दिशि पंचदशो दक्षिणतः सप्तदशः पश्चात् एकविंश उत्तरतः । नोक्थ्ये प्रवृंज्यात् । प्रतिमुखमग्निचयाः कर्तव्याः । अपि वा पूर्वस्मिन्नग्निचयः इतरेषु सावित्राः स्युः । अपि वाग्निश्च सावित्रश्च न चेतव्यः ।०

It ends, fol. 9*b*: इति समाप्तः सर्वतोमुखः ॥ बृहस्पतिसवो नाम यतंसे क्रियतामयं । वसंत एव कर्तव्यः स्वतंत्रो नियमे न तु ॥ काम्यैर्गो भवेत्तस्य (!) सामान्येन विधानतः । स्वतंत्रे तु पुरोडाशादि फलेप्सो Here the MS. breaks off abruptly.

The last leaf contains the following *Brāhmaṇa* passage: ओम् तेवासुरा ह यत्र महासंग्रामं संयेतिरे ऽथ शिबिरौशीनरो देवानां वर्गादसुराणां च जिगाय तस्मो हेंद्रो जितवरं ददौ स होवाच शिविर्ज्येष्ठं भयं न गच्छेदिति तं वर्षिष्ठीयप्रस्थेन सर्वतोमुखेन याजयां चकार ततो ह वा एतच्छिविर्ज्येष्ठं भयं न गच्छति यं कामं कामयेतानपजय्यं जयेदिति तं वर्षिष्ठीयप्रस्थेन सर्वतोमुखेन याजयेदनपजय्यमेव जयति । तदेताश्चतस्रः शाला अनुदिशं मापयंति प्रचरंति प्रांचः प्रचरंति दक्षिणा प्रचरंति प्रत्यंच उदंचः प्रचरंति । मध्ये गार्हपत्यो भवति मध्यत आसीनाय भक्षानाहरंत्यनुदिशं स्तोमाः स्युरित्येतदेकं एकविंशाः स्युरित्येतदेकं अनादृत्य तच्चतुष्टोमानेव कुर्वंति ॥

The last page contains directions regarding the construction of the fire-altars, beginning: अग्निप्रयोगो वक्ष्यते ।० [H. T. COLEBROOKE.]

## 436.

**1661.** Foll. 104; size $8\frac{1}{2}$ in. by $3\frac{1}{2}$ in.; indifferent Devanāgarī writing of the latter part of last century; 5–7 lines in a page.

*Cayanapaddhati*, a manual for the construction of fire-altars, chiefly in accordance with *Kātyāyana's Śrautasūtra*. There are blanks left here and there.

It begins: अग्निः सोमांगं तद्गुणव्यतिषंगात् । etc. (*Kāty.* XVI. 1, 1–6)० दद्यात् । एकपश्वालंभपक्ष उच्यते । श्यामतूपरो वा प्राजापत्यः । मातृश्राद्धं । समारोपः । उदवसानं । मंथनं । etc. इत्युखासंभरणं fol. 12; अथ चयनपरिभाषा fol. 22*b*; इति चित्योपस्थानं fol. 37; अथ द्वितीया [चि]तिरुच्यते fol. 41*b*; अथ तृतीया चितिरुच्यते fol. 44*b*; शतरुद्रियहोम० fol. 55*b*, etc.

It ends: पुनश्चितं । आचयनं वा । चित्यस्याहवनीयाभिसंपन्नः ॥ इति चयनपद्धति ॥०॥ श्रीजयनाथदीक्षितेन लेखापितं ॥ [H. T. COLEBROOKE.]

## 437.

**86C.** Foll. 42 (and a leaf inserted between 16 and 17); size $10\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; fairly written, in the Devanāgarī character; 10–14 lines in a page.

*Agni-prayoga*, a chapter of a manual, following the *Baudhāyana-sūtra*. It begins:

बोधायनं नमस्कृत्य व्याख्यातृंश्च पुरातनान् ।
अग्निप्रयोगं वक्ष्यामि विष्णुवृद्धान्वयो ऽग्निचित् ॥

उक्तः सर्वप्रकृतिभूतो ज्योतिष्टोमो ऽग्निष्टोमः । अथेदानीं सर्वप्रकृतिविकृतिसाधारणमग्निष्टोमेन सह व्याख्यातुमारभते । एषो ऽग्निरनारभ्याधीतत्वात्प्रकृतिगामी ज्योतिष्टोमाद्यंगभूतश्चादीक्षोपसदादिसोमव्यतिषंगदर्शनात् । नन्वनारभ्याधीतस्याग्नेः प्रकृतौ प्रकरणपठितोत्तरवेदिविरोधात्प्रकृतिनिवेशे निरवकाशत्वाद्विकृतिष्वेव निवेशः । तद्धि सर्वविकृतिष्वग्नेर्नियतत्वात्साग्निचित्यो भवतीति न क्वचिदुच्यते । सत्यं । यत्र विकृतिषु साग्निचित्यो भवतीत्युक्तं तत्र नियतो ऽन्यत्र विकल्पः । नोत्तरवेदिमुपवपति इति क्वचिद्विकृतिषु दर्शनाच्च । अतः प्रकृतावुत्तरवेदिः विकृतिष्वग्न्युत्तरवेद्योर्विकल्प इति । उच्यते । प्रकृतावग्न्युत्तर-

वेद्योर्विकल्पः। अथातो ऽग्निमग्निष्टोमेनानुयजन्त इति श्रुतेः। उक्तं च द्वैधे। अनिष्टप्रथमयज्ञस्य दीक्षाहुतीनां होम इत्याध्वरीकाणि हुत्वाग्निकानि जुहुयादिति बोधायन आग्निकान्येवेति शालीकिः। तस्मात्प्रकृतिषु विकृतिषु वचनादृते ऽन्युत्तरवेद्योर्विकल्प एवेति। तस्मात्प्रकृतौ षडुपसत्कपक्षमाश्रित्य प्रयोगो वक्ष्यते। उखाः संभरिष्यन्नित्यादि।०

The last page and a half have been written by a different hand; this passage beginning: एवं द्विशतः प्रस्तारः॥ and ending:

दक्षिणपक्षाद्यपक्षीनां पश्चिमास्तिस्रस्त्रिष्टुभस्तासामुत्तरास्तिसः पंचम्यः पङ्क्त्यः (!)।

In the margin of fol. 1, the treatise is called *Baudhāyanakalpabhāshyavivaraṇa*. *Cf.* Burnell, *Index of Tanjore MSS.*, p. 18*b*, l. 46 (MS. 3,800). [H. T. COLEBROOKE.]

## 438.

**619b.** Foll. 11; size 9½ in. by 4 in.; well written, in Devanāgarī, about the middle of the 16th century; ten lines in a page.

*Somaśatadvayī*, two centuries of stanzas on the Soma, its extraction, employment, etc., and the *Somavrata*. It begins:

> आगूर्यर्त्विक्प्रवरवरणं * तेन हुत्वा वृणीते
> मंत्रैः पर्कैः सुरगणनुतिः श्राद्धमारोप्य याति।
> एदं यष्टुर्मथनविभजे ग्निर्यजुर्भिः प्रणीते
> सोमावेषस्त्यजनविहृतिः सप्त हित्वाहितिः स्वे॥

स्वे दक्ष इत्येतदजसपक्षे होतुः पुरस्तादथ दीक्षणीया।
स्याद्दैक्षणीयं हविरेवमूहो व्रतं समं स्याद्दर्शेमंतरेण (!)॥

It ends:

पूर्णाहुती रात्रिमतीत्य चेत्स्यात् पूर्णाहुतेराहवनीय एव।
एकाहुतिं व्याहृतिभिश्च हुत्वा ततस्तु पूर्णाहुतिहोम इष्टः॥
आधानकं स्याद्यदि सोमपूर्वमारभ्यते च प्रथमाग्निहोत्रं।
होमो ग्निहोत्रस्य तु काल एव मंथ्यस्तु होमो ग्निरजसपक्षे॥

The front page of fol. 1 shows two names of former owners: देवराघवस्य आंबेकरस्य (scored out) and पुस्तकं सदाशिवदेवीयम्। [H. T. COLEBROOKE.]

## 439.

**1730b.** Foll. 72; size 8¾ in. by 4 in.; fairly written, in Devanāgarī; seven lines in a page. *Kāmyeshṭy-advilā* (?), a manual of voluntary offerings at New and Full-moon, for the obtainment of special objects; with Vedic texts, not accented.

It begins: काम्याभिरिष्टिभिरमावास्यायां पौर्णमास्या वा यजेत काम्या इति प्रायवादः॥ अकाम्या अपि त्वाम्नायंते यथा जातेष्टिः पथिकृत्कृमिवत्यादयः। तासामपि काम्यधर्मा स्युः आज्यभागादि। अमावास्यायां पौर्णमास्या वा यजेतेत्येतत्सूत्रारंभ उभयत्र प्रवृत्त्यर्थं। अथवा काम्यानामेवं पर्वनियमः।०

It ends: यज्ञो बभूव यज्ञसंचमवर्जे ब्राह्मणतर्पणांतेष्टिः संतिष्ठते॥ इति काम्येष्ट्यांड्विला समाप्तः॥ संवत् १८०० वर्षे कार्त्तिककृष्णा तृतीयायां रविवासरे॥ लिखतं भोलानाथशुभं भूयात्।०

On the outside of fol. 1 the treatise is called काम्येष्टिअड्विलाश्रौत॥ [H. T. COLEBROOKE.]

## 440.

**619d.** Foll. 19; size 9½ in. by 4 in.; fairly written, in the Devanāgarī character, about A.D. 1600; nine lines in a page.

*Gopālikakārikā*, being 420 *ślokas* on various matters, connected with religious observances, such as the measurement and construction of altars, sacrificial implements, etc.

The treatise begins:

> अथातो ग्निरनारभ्य न्यायेन प्रकृतिं गतः।
> दीक्षादिलिंगतस्तस्य ज्योतिष्टोमांगता स्थिता॥
> पृथक्प्रकरणाम्नानाद्गुणकामान्न नैत्यकः।
> अनिष्टप्रथमेत्यादेर्द्वैधे ऽलिंगस्य दर्शनात्॥
> आद्ये पि सोमयागे स्यात्केवलं नोत्तरक्रतौ।
> स चाप्येकादशाकारश्येनादिः शुल्वदर्शितः॥

It ends:

> समानमेव वरुणप्रघासवदिहेतरान्।
> यथाकालं समानो न्यः सो यमग्निः समाप्यते॥ ४२०॥

* ? आगर्ये विद्युत्प्रवरणं MS.

**इति गोपालिकाकारिकाः समाप्ताः ॥ नमो भगवते बोधायनाचार्याय ॥ ० ॥**

After this a line has been obliterated.

[H. T. Colebrooke.]

## 441.

**84b.** Foll. 46; size $10\frac{3}{4}$ in. by $4\frac{3}{4}$ in.; beautifully written, in Devanāgarī, by *Mathurānātha*, A.D. 1697; twelve lines in a page. The MS. is preceded by a duplicate of the first page in a more modern hand.

*Prāyaścittapradīpikā*, a compendium of Vedic rites of expiation, by *Varadādhīśa yajvan somapa*.

It begins:

यस्य प्रसादान्मूको ऽपि भवत्यागमपारगः ।
तं वंदे वेंकटाधीशं सर्वाभीष्टप्रदं गुरुं ॥ १ ॥
वत्सवंशावतंसेन वरदाधीशयज्वना ।
उच्यते सोमपेनैषा प्रायश्चित्तप्रदीपिका ॥ २ ॥
बालानां सुखबोधाय क्रियते दीपिका यतः ।
तस्मादस्य न दोषो ऽस्ति सर्वत्र पुनरुक्तितः ॥ ३ ॥

दर्शपूर्णमासादिष्वादित आरभ्य कर्म कुर्वतामृत्विजां दैवादज्ञानाद्वा ज्ञानेऽपि प्रमादाद्वा पुरुषाशक्त्या वा भेषः प्रायेण भवेत ॥ ०

Towards the end the author informs us that he deals only with the most important expiatory rules; for further information he refers us to his *Prayogavṛitti*, and for final appeal to the commentaries on the *sūtras*, and the concurrent opinion of those versed in these matters.

For another copy of this manual see Aufrecht, *Cat. Bodl.* p. 370. [H. T. Colebrooke.]

## 442.

**1572c.** Foll. 20; size $9\frac{1}{2}$ in. by 4 in.; indifferent Devanāgarī writing of the latter part of the 17th century; 12–15 lines in a page.

*Śrautaprāyaścittaprayoga*, an exposition of *Āśvalāyana's* precepts (III. 10) for expiating irregularities in the performance of *ishṭis*; with references to *Baudhāyana*.

It begins:

सर्वशास्त्रार्थमर्यादापरीक्षणविचक्षणात् । (!)

अथाश्वलायनानां श्रौतप्रायश्चित्तान्युच्यन्ते ॥ तानि च विहिताकरणे अन्यथाकरणे च भवन्ति । मुख्याभावे प्रतिनिधेरुपाधानम् । यथाद्रव्यदेशकालदक्षिणार्त्विक्पत्नीप्रमुखानां मुख्यानामभावे बौधायनाद्युक्तयथोचितप्रतिनिधीनादाय कर्म कार्यम्। न तत्र प्रायश्चित्तानि तानि त्वनिमित्तानंतरं कर्तव्यानीत्युत्सर्गः । ब्रह्मत्वस्तु कर्मसु इष्टिवर्जितानि प्रायश्चित्तानि ब्रह्मा कुर्यात्। इतराण्यध्वर्य्वादयः कुर्युरित्युत्सर्गः ॥ क्वचिदपवादं वक्ष्यामः । अत्र प्रायश्चित्तानि नैमित्ति(क)कर्मविशेषा अभिधीयंते । अथान्वाहिताग्नेः प्रयाणविधिः [A. III. 10, 3]।०

It ends:

इमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः ।
धातुश्च योनौ सुकृतस्य लोके स्योनं ते सह पत्या करोमि ॥
(*Taitt. S.* iii. 5, 6, 2.)

इति नित्यहोम ऐष्टिकप्रायश्चित्तप्रयोगः ॥

[H. T. Colebrooke.]

## 443.

**619c.** Foll. 41; size $9\frac{1}{2}$ in. by 4 in.; Devanāgarī character; indifferent handwriting; 12–14 lines in a page.

*Prāyaścittaprayoga*, a manual of expiatory rites, based on the rules of *Āśvalāyana*, *Āpastamba* and *Baudhāyana*.

It begins:

विध्यपराधे प्रायश्चित्तिः । विधिशब्देन विहितमुच्यते । विहितस्याकरणे ऽन्यथाकरणे प्रायश्चित्तिः कर्तव्या । प्रायो विनाशः । चित्तिः संधानं । विनष्टसंधानं । विनष्टसंधानं प्रायश्चित्तिरित्युक्तं भवति । तथा च विध्यपराधे सति तदर्थं यदि विशेषतो विहितमस्ति तदा तदेव कर्तव्यं । नास्ति चेद् व्याहृतिहोमः कर्तव्यः । एतदेव सर्वप्रायश्चित्तमुच्यते । एवं च सति यथा कथंचिद्विधिसंपादने प्रायश्चित्ताभाव उक्तो भवति । प्रायश्चित्तकालस्तु निमित्तानंतरमेवेत्युत्सर्गः । ऐष्टिके तंत्रे प्रधानस्विष्टकृत्समिष्टयजुर्होमाद्वा प्रागिति बौधायनः । ०

इति सकलप्रायश्चित्तोपयोगिपरिभाषाप्रकरणं । fol. 4; ० आधानप्र ० fol. 5; अग्निहोत्रप्रा ० fol. 14; अन्वाहि-

तारने: प्र॰ fol. 15; अभ्युदयेष्टिप्रा॰ fol. 20; दर्शपूर्णमासप्र॰ fol. 23; इति प्रायश्चित्तप्रयोगे पशुप्रकरणं। अथ सोमप्रायश्चित्तं। fol. 26; इति प्रयोगरत्ने सोमप्रकरणं। अथ प्रायश्चित्तेष्टीनां प्रयोग: fol. 36*b*.

It ends: इत्यापस्तंबोक्ता इष्टय: समाप्ता: ॥ वैशाखशुक्ल १३ गुरौ संवत् १६७० ॥ [H. T. Colebrooke.]

## 444.

**1129c.** Foll. 24 (foll. 166–189 of the volume); size $11\frac{1}{4}$ in. by 4 in.; Devanāgarī character; indifferent handwriting of about A.D. 1700; ten lines in a page.

A portion of the same manual. It begins:

प्रणम्य शिरसा देवं लक्ष्मीकान्तं तथा गुरुम्
श्रीमच्च पितरौ तद्वत्तथा मे कुलदैवतम् ॥

विध्यपराधे प्रायश्चित्ति:। विधिशब्देन विहितमुच्यते विहितस्याकरणे ऽन्यथाकरणे प्रायश्चित्ति: कर्तव्या।॰

We note some additional headings:

Fol. 4: इति सकलप्रायश्चित्तोपयोगिपरिभाषाप्रकरणं ॥ अथाधाने ऽग्न्यनुगमनप्रायश्चित्तं। fol. 5*b*: इत्याधानप्रकरणं। अथाग्निहोत्रे अग्न्यनुगमने प्रायश्चित्तं। fol. 10: इत्याश्वलायनानामग्निहोत्रद्रव्ये स्कन्नप्रायश्चित्तं। अथापस्तंबानां। fol. 11: अथाग्निहोत्रेंतरागमने आश्वलायनानां प्रायश्चित्तं॥ – ॥ अथाग्निहोत्रहोमकालातिक्रमे प्रायश्चित्तं ॥ fol. 12: अथाश्वलायनानामग्निहोत्रे ऽनुद्धरणप्रायश्चित्तं। fol. 12*b*: अथापस्तंबानां ॥ fol. 13*b*: इति होमविच्छेदे प्रायश्चित्तमापस्तंबानां। fol. 15: इत्यग्निहोत्रप्रायश्चित्तप्रकरणं। अथ दर्शपूर्णमासप्रायश्चित्तं। fol. 16*b*: इत्याश्वलायनस्य हविर्दोषप्रायश्चित्तं। अथापस्तंबानां। fol. 21*b*: इत्यभ्युदयेष्टिप्रायश्चित्तं। अथ दर्शपूर्णमासादिषु विपर्यासप्रायश्चित्तं। fol. 24: इत्येकाध्वर्यवप्रायश्चित्तं।

The MS. ends: इति दर्शपूर्णमासप्रकरणं ॥

Fol. 1*a* gives the title भावीप्रायश्चित्तपुस्तकं, substituted for the original दर्शपूर्णमासप्रायश्चित्त.

[H. T. Colebrooke.]

## 445.

**1541c.** Foll. 19; size $11\frac{1}{2}$ in. by 4 in.; fairly written, in the Devanāgarī character, in the latter part of last century; eight lines in a page.

*Agnihotraprāyaścittaprayoga*, based on *Āśvalāyana* (with references to *Āpastamba*); composed, at Benares, by *Tryambaka*, son of *Krishṇabhaṭṭa*, surnamed *Motha*.

The MS. begins: विध्यपराधे प्रायश्चित्ति: ॥ विहितस्याकरणे। अन्यथाकरणे पायश्चित्ति: कर्तव्या। अपराधे सति तदर्थतदाविहितमस्ति चेत्तदेव कर्तव्यं। तन्नास्ति चेद्व्याहृतिहोम: कर्तव्य:। कालस्तु प्रायश्चित्तानां निमित्तानंतरं॥ शिष्टाभावे प्रतिनिधि: ॥॰

The *Prāyaścittapradīpa* (॰*pratipa*!) is referred to fol. 4.

It ends: इति आज्याहुतीर्जुहुयात्। इति प्रायश्चित्तानि समाप्तानि [वि]ध्यपराधे। मोल्होपनाम्न: कृष्णभट्टस्य सूनुना त्र्यंबकेन काश्यां कृत: प्रयोग: ॥ इत्यग्निहोत्रप्रायश्चित्तं समाप्तं ॥

[H. T. Colebrooke.]

## 446.

**1360.** Foll. 74; size 10 in. by $4\frac{1}{4}$ in.; legibly written, in Devanāgarī, in A.D. 1620; 11–13 lines in a page.

*Prāyaścitta-paddhati* (or -*pradīpikā*), a similar manual, following chiefly the *Kātīya-Śrautasūtra*, by *Rāmacandra*, son of *Sūryadāsa*.

It begins:

संम्राजो ऽग्निचितो नत्वा विद्याकरगुरो: पदे।
राम: पद्धतिमाधत्ते प्रायश्चित्तप्रदीपिकां ॥ १ ॥
कात्यसूत्रोदितं सर्वमत्र वाच्यं मया स्फुटं।
समुच्चयो ऽन्यत्र दृष्टो विशेष: क्वचिदेव तु ॥ २ ॥

कर्माणि स्वस्वांगयुक्तानि यथोक्तफलसाधनसमर्थानि भवंति।॰ अथादिष्टप्रायश्चित्तान्युच्यंते। तत्र प्रथमतो ऽग्निहोत्रकर्मप्रायश्चित्तानि।॰ fol. 5.

The treatise consists of 14 *kaṇḍikās*. Of comparatively recent authorities, *Karka*, *Govindarāja* and *Ananta* (*yājñika*) are most frequently referred to. Quotations have also been noticed from *Vāsudeva* and *Maṇḍanācārya* (a number of *ślokas* on *Punarādheya*, fol. 15; *Maṇḍanoktau gauṇakālakārikāḥ*, fol. 25*b*).

It ends : इति चयने प्रायश्चित्तविशेषाः ॥ ०

कृत्वीमितामग्निचिद्रामचंद्रः सूत्रैकार्थी नैमिषारण्यवासः ।
संम्राजः श्रीसूर्यदासस्य सूनुः प्रायश्चित्तेः पद्धतिं संव्यधत्त ॥

इत्यग्निचिद्रामचंद्रविरचिता प्रायश्चित्तपद्धतिः समाप्ता ॥ ०
संवत् १६७६ वर्षे पौषमासे शुक्लपक्षे १४ तिथौ लिखितं ॥ ०
श्रिरग्निचित्संम्राट्स्थपतिदीक्षितवामनसुतअचलेन* लखापितं॥

[H. T. Colebrooke.]

## 447.

**259b.** Foll. 59; size 10½ in. by 4¼ in.; legibly written, in the Devanāgarī character, in the latter part of the 17th century; 10–12 lines in a page.

*Yajñaprāyaścittavivaraṇa*, an exposition, by *Gopāla*, of *Baudhāyana's* rules of expiation. Three *praśnas*, of 11, 10 and 8 adhyāyas respectively.

In the *Prāyaścittapradīpa* (No. 449) this work seems to be referred to as (*prāyaścitta-*)*sūtrabhāshya*.

It begins:

अथातो मंत्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः। उक्तानि दर्शपूर्णमासादीनि कर्माणि अनंतरं तेषामकरणे अन्यथाकरणे वा प्रायश्चित्तानि व्याख्यास्यामः । अतःशब्दो हेतौ यस्माद्दर्शपूर्णमासादीनां कर्मणां सकलावगतिर्वैगुण्यावगतेर्हेतुः तस्मादनंतरं विहितानामकरणे अन्यथाकरणे वा प्रायश्चित्तानि व्याख्यास्यामः । ०

*Praśna* II. begins: अथ वै भवति यः पापयक्ष्मगृहीत आहिताग्निः क्षयरोगगृहीतः रहस्येष्ट्या यजेतेति संबंधः। ०

*Praśna* III. begins: अथातिदग्धानि सदो हविर्धानानीति बहुवचनं शकटावेकं समस्तं देवयजनं दग्धं स्यात्तत्र सदो हविर्धानान्यावृतैव क्रियेरन् । ०

It ends: एवं हि श्रूयते मलवद्वाससा न संवदेत न सहासीत नास्या अन्नमद्यादित्यारभ्याभ्यंजनमेव न प्रतिगृह्य काममन्यदित्युक्तं अन्यत्सहासनादिति भवस्वामिना व्याख्यातं ॥

इति गोपालकृते यज्ञप्रायश्चित्तविवरणे तृतीयप्रश्नस्याष्टमोध्यायः ॥

A few lines have been added by a modern hand, in which the *Kapardibhāshya* is quoted.

For another MS. of this work, see *Rājendralāla Mitra*, Notices ii. p. 187.

[H. T. Colebrooke.]

## 448.

**1572b.** Foll. 44; size 10 in. by 4½ in.; legibly written, in Devanāgarī, in the latter part of the 17th century; foll. 1–5 by a different hand from the rest; 10–14 lines in a page.

*Śrautaprāyaścittacandrikā*, another exposition of *Baudhāyana's* rules of expiation, by *Viśvanātha Bhaṭṭa*, son of *Nṛisiṃha Dīkshita*.

It begins:

पंचशरवैरिसंचितमगणितपुण्यं गणेशजन्मपदं ।
अंचितदृगंतकरुणं कंपत्र (!) कलयामि शोणितोल्लासं ॥१॥
बौधायनावताराय तपःसाराय मे नतिः ।
चिदंबराय गुरवे भिक्षवे स्तु मुमुक्षवे ॥ २ ॥

श्रौतकर्मसु भ्रमप्रमादाभ्यामकरणस्यान्यथाकरणस्य वा संभावितत्वेन कर्मणामसांगत्वापत्तिशंकया लोकानामप्रवृत्तेरशक्यानुष्ठानलक्षणमप्रामाण्यं प्रसज्येत । अतो ऽकरणान्यथाकरणदोषदुष्टान्यपि कर्माणि कृतप्रायश्चित्तानि सांगानि भवंतीति कर्मनिर्वाहकानि प्रायश्चित्तान्युच्यन्ते। यथाहुराचार्यपादाः । प्रायो विनाशपर्यायः । स चाप्यकरणाद्भवेत् । अन्यथाकरणाद्वा तत्संधा चिन्निरुच्यते। तानि द्विविधानि मंत्राम्नातानि गणाम्नातानि च । मंत्रलिंगेनाम्नातानि मंत्राम्नातानि । आभिर्गीर्भिरित्यादीनि । गणेनाम्नातानि भिंदादिगणादीनि । प्रायश्चित्तहोमकालास्त्रयः प्रधानसौविष्टकृत्समिष्टयजुषां प्रागित्येवमादयः । ०

It ends: अग्नये हिरण्यं सोमाय वासः रुद्राय गामिति प्रतिग्रहः ॥ इनि त्रेधातविवेष्टिः (!) ॥ ० ॥ इति श्रीनृसिंहदीक्षितसूनुविश्वनाथभट्टविरचितायां श्रौतप्रायश्चित्तचंद्रिकायां तृतीयप्रश्नः समाप्तः ॥

For another MS. of this treatise see *Rājendralāla Mitra's* Notices, I. p. 88.

[H. T. Colebrooke.]

## 449.

**1467A.** Foll. 99; size 9¼ in. by 4 in.; legibly written, in Devanāgarī, about the middle



* The syllables अचले supplied by a later hand, the original word having been obliterated by ink.

of last century; foll. 49–64 by a different hand from the rest; ten lines in a page.

*Prāyaścittapradīpa*, an anonymous treatise on propitiatory rites, based mainly on *Baudhāyana's* precepts, and the commentaries thereon.

It begins: श्रीबोधायनाचार्याय नमः ॥

नत्वा बोधायनाचार्यं तेनोक्तश्रौतकर्मणां ।
विध्यतिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते ॥ १ ॥
श्रौते बोधायनोक्तानि प्रायश्चित्तानि यानि च ।
उक्तानि सूत्रभाष्ये च वर्धगोपालसूरिणा ॥ २ ॥
व्यासोक्तानि प्रकीर्णानि तैरनुक्तानि॰यानि च ।
भवस्वामिमतान्येषां विस्तरान्निर्णयं ब्रुवे ॥ ३ ॥
पंच प्रकरणान्यत्र तेष्वाधानाग्निहोत्रके ।
दर्शाद्याग्रयणाद्यन्तः सोमश्चेति यथाक्रमं ॥ ४ ॥

अथातो मंत्रगणाम्नातानीत्यादि । अथशब्द आनंतर्ये कर्माण्यभिधायानंतरं प्रायश्चित्तमभिधीयते । अतःशब्दो हेत्वर्थे यस्मात्कर्मणि वैगुण्ये सति प्रायश्चित्ते कृते कर्म सगुणं भवति । अतः प्रायश्चित्तानि व्याख्यास्यामः । विहितानामकरणे ऽन्यथाकरणे वा प्रायश्चित्तं विधीयते । मंत्रगणाम्नातानि मंत्रेणाम्नातानि गणेनाम्नातानि चिन्मात्रेणावगम्यंते कानिचिद्गणेन ब्रह्मप्रतिष्ठा मनस इत्येवमादीनां प्रायश्चित्तत्वं मंत्रसामर्थ्यं नावगम्यते । उरुयं तं सरस्वतीत्येवमादीनां प्रायश्चित्तत्वं गणसामर्थ्यादवगम्यते । प्रायो विनाशश्चित्तं संधानं तदुच्यते । सर्वत्र प्रायश्चित्तहोमेषु स्मार्तवदाज्यसंस्कारं कुर्यात् । तत्र क्रमः । गार्हपत्याद्दुत्तरतो दर्भेषु आज्यस्थाली स्रुवं जुहूं प्रोक्षणीपात्रं चासाद्य॰

*Iti — ādhānaprakaraṇam*, fol. 6; *agnihotraprakaraṇam*, fol. 24; *darśapūrṇamāsaprakaraṇam*, fol. 52; [*ity āgrayaṇaprāyaścittam, atha mrigāreshṭiḥ*, fol. 53; *atha pavitreshṭiḥ*, fol. 56; *atha nakshatreshṭayaḥ*, fol. 58*b*; *atha cāturmāsyānām prāyaścittāni*, fol. 69]; *iti — āgrayaṇādyam nāma caturtham prakaraṇam*, fol. 77*b*.

It ends: ओं स्वाहेत्यादिप्रणवेनांत । एतैः सर्वैः क्रत्वंतप्रायश्चित्तानि जुहुयात् ॥

इति प्रायश्चित्तप्रदीपे सोमप्रायश्चित्तं नाम पंचमं प्रकरणं ग्रंथश्च संपूर्णः ॥ संवत् ॥ पौषमासे कृष्णपक्षे तृतीयायां चंद्रवासरे ॥

For other MSS. of this treatise see Burnell, Cat. of Vedic MSS., p. 27; Index of Tanjore MSS., p. 27. [H. T. Colebrooke.]

## b. Grihya Ritual.*

### 450.

**1028.** Foll. 132; 4to, size 11 in. by 8½ in.; written, somewhat indistinctly, in Bengalī; 12–14 lines in a page. European paper.

*Keśava Miśra's Chandogapariśishṭa*, an exposition of brāhmanical duties; together with a commentary, entitled *Pariśishṭaprakāśa*, by *Nārāyaṇa*, son (?) of *Goṇa*, and grandson of *Umāpati*.

The MS. is unfortunately very incorrect, and the writing lacks individuality and distinctness. The beginning of the text and *Prakāśa* is here reproduced with the help of *Śrīnātha's* commentary (No. 451).

यस्याज्ञा जयति श्रुतिस्मृतिमयी यत्पादपाणामयो
धर्मो कैश्चिदुपास्यते सुकृतिभिः गङ्गेत्यभिख्यां गतः ।
यं ज्योतिर्मयमन्तरुज्ज्वलतमश्छेत्तुं पुरस्कुर्वते
सन्तः पातु जगन्त्यमुख्यगिरामर्थः स देवो हरिः ॥ १ ॥
इह जगति वन्दितपदाः सदा नरेन्द्रैः पवित्रजन्मानः ।
वसुधासुधाभुजः कति नाभुवन् काञ्चिविन्दीयाः २ ॥
चरितमहति तेषामन्वये सोमपीती
समजनि परितोषश्छन्दसां देहबन्धः ।
अलभत स हि विप्राच्छासनं तालवाटीं
तदिह भजति पूज्यामुत्तरा येन वाढा† ॥ ३ ॥
तस्माच्चतुर्थखण्डं पिशाचखण्डं तथारापडला (!) ।
हि जनवनादिकमपरं निःसृतमनघं कुलस्थानं‡ ॥ ४ ॥
जज्ञे ऽथ भुवनस्य पावनहेतुरेकः
श्रौते विधौ सततनिर्मलधीप्रसारः ।
प्राक् पूजितो विबुधसदसि धर्मनामा
नामानुरूपचरितः§ परितोषसूनुः ॥ ५ ॥

* For a number of other treatises on this subject, not specially assigned to a particular Vedic school, see under *Ācāra*.

† स परितोषो विप्रात् ब्रह्मणात्तालवाटीसंज्ञं स्थानमलभत येन शासनेन उत्तरा वाढा पूज्यां भजति । Comm.

‡ Part of the comment on this *śloka* is wanting.

§ नाभार्थैरूपचरितः text.

तस्मादजायत सदायतनं गुणानां
भट्टेश्वरो निखिलकोविदवन्दनीयः ।
मध्येसभं* स्थितिमतां प्रथमाभिधेयः
सेवातिसक्तहृदयः पदयोर्मुरारेः ॥ ६ ॥
तस्माद गदाधर इति द्विजचक्रवर्ती
राजप्रतिग्रहपराङ्मुखमानसो ऽभूत् ।
पुण्यानि केवलमहर्निशमर्जयन् यः
शान्तश्चिराय समयान् गमयाम्बभूव ॥ ७ ॥
तस्माद्भूषितसार्भिभूमिवलयः शिष्योपशिष्यव्रजैर्
विद्वन्मौलिरभट्टमापतिरिति प्राभाकरग्रामणीः ।
क्ष्मापालाज्जयपालतः स हि महाश्राद्धं प्रभूतं महा-
दानं चार्थिगणार्हणार्द्रहृदयः प्रथमहीत् पुण्यवान् ॥ ८ ॥
अस्यात्मजः सुकृतयानथ कृतसवैः सुदक्षिणो बहुधा ।
उदियाय गोणनामा† गुरुरिव‡ तन्त्रपुराणज्ञः ॥ ९ ॥
शश्वद्विश्वजनीननिर्मलगुणे भूलोकवाचस्पतौ
प्रेङ्खत्कीर्त्तिसरित्प्रवाहनिवहप्रक्षालिताशामुखे ।
यस्मिन् कृष्णपदैकलीनहृदये धर्माधिकारास्पदं
विभ्राणे द्विजमन्दिराण्यधिवसन्निर्धूतदोषा श्रियः§ ॥ १० ॥
जातस्ततः|| स्मृतिपुराणविदामुपास्य
विद्याः प्रभाकरमतस्थितिलब्धकीर्त्तिः ।
ख्यातः सतां सदसि मित्रजनेषु च श्री-
नारायणः सततकृष्णपरायणात्मा ॥ ११ ॥
छन्दोगपरिशिष्टस्य सर्वार्थालोकहेतवे ।
परिशिष्टप्रकाशाख्यश्चक्रे तेनैव धीमता ॥ १२ ॥

अथातो गोभिलोक्तानामन्येषां चैव कर्मणां ।
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् ॥ १ ॥

अथ वेदाध्ययनानन्तरं गृहस्थाश्रमप्रवेशोन्मुखस्य (!) माणव-
कस्य गोभिलोक्तानामाधानादिगृह्यकर्मणामन्येषां ०

ऊर्ध्वं तु त्रिवृतं कार्यं तन्तुत्रयमधोवृतं ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥ २ ॥

यज्ञोपवीतिना चान्तोदकेन कृत्यं । इति गोभिलोक्ता पुनर्य-
ज्ञोपवीतं कुरुते ० ॥ इदानीं यज्ञोपवीतस्य दैर्घ्यमाह ।

धृतवंशे च नाभ्यां च धृतं यद्विन्दते कटिं ।
तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितं ॥ ३ ॥ ०

* = सभामध्ये.

† अन्यस्तु गोन इति पठति Comm.

‡ = प्रभाकर इव Comm.; ? supply स (तन्त्र ०)

§ अधिवसन् is imperfect, without augment.

|| ततस्तस्माद्देशात् Comm.

*Prapāṭhaka* II. begins fol. 31*b*: प्रातःस्नानानन्तरं प्राप्तां सन्ध्यामाह ।

अत ऊर्ध्वं प्रवक्ष्यामि सन्ध्योपासनिकं विधिं ।
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः ॥

*Prapāṭhaka* III. fol. 88:

असमक्षं च दम्पत्योर्होतव्यं नर्त्विगादिभिः ।
द्वयोरप्यसमक्षं हि भवेद्धुतमनर्थकं ॥

ऋत्विक्पुत्रगुरुभ्रातृभागिनेययामातृभिर्जायापत्योर्यजमानयोर-
समक्षं हुतं निष्फलं स्यात् ।०

The MS. breaks off abruptly before the conclusion of this chapter in the interpretation of this *śloka*:

गोशालायां प्रणीयाग्निं सत्कृत्य व्रीहि *lacuna* ।
अग्निपूषेश्वरेन्द्रेभ्यो निर्वपेत्पायसं चरुं ॥

[H. T. Colebrooke.]

## 451.

**643.** Foll. 83; size $12\frac{3}{4}$ in. by 4 in.; well written, in the Bengālī character; seven lines in a page. Modern.

[*Chandoga-*] *Pariśishṭaprakāśa-sāramañjarī*, a commentary on *Nārāyaṇa's Prakāśa*, by *Śrīnātha Ācāryacūḍāmaṇi*, son of *Śrīkarācārya*. The first two chapters.

It begins:

यः सृष्टिस्थितिनाशहेतुरमरश्रेणीशिरोभूषण-
भाजत्पादसरोरुहः क्रतुमतां दाता फलानां शिवः ।
भक्तानां सुरपादपः स जगतामीशः सदा चिन्त्यतां
किं मिथ्याचिरचिन्तनैश्चपल हे चेतः प्रसीदाशु मे ॥

श्रीकराचार्यपुत्रेण श्रीमतश्रीनाथशर्मणा ।
परिशिष्टप्रकाशस्य क्रियते सारमञ्जरी ॥

अथ प्रारिप्सितप्रतिबन्धकीभूतदुरिता पूर्वविघाताय शिष्टाचा-
रपरम्पराप्राप्तमिष्टदेवताकीर्त्तनरूपमङ्गलमाचरन् शिष्यशिक्षार्थं
ग्रन्थकृत् ग्रन्थादौ निबन्धनाह । यस्येति । तत्र धर्मप्रधानक-
स्मृतिशास्त्रव्याख्यानकर्तृस्तत्प्रतिपादकदेवताकीर्त्तनमेव समाचरन्-
मिति तदेवाह । यस्य भगवतः श्रुतिस्मृतिमयी आज्ञा जयति
सर्वेति कर्मेण वर्त्ततां ।०

It ends: इति महामहोपाध्यायश्रीकराचार्यात्मजश्रीश्रीनाथाचार्यचूडामणिकृतपरिशिष्टप्रकाशटिप्पण्यां सारमञ्जर्यां द्वितीयप्रपाठकः ॥ [H. T. COLEBROOKE.]

## 452.

**5a.** Foll. 59, numbered 1, 1*a*, 2–58; European paper; folio, size 8 in. by 13 in.; Bengālī character; ten lines in a page.

[*Chandoga-*] *Daśakarma-paddhati*, or (as it is called on the title-page) *Saṃskāra-paddhati*; a manual of initiatory rites, according to the *Chandoga* ritual, by *Bhaṭṭa Śrī-Bhavadeva*; with a partial interlinear English translation in Colebrooke's handwriting.

The work begins:

> चतुर्वेदनमस्यस्य चतुर्वेदकुटुम्बिने ।
> द्विजानुष्ठेयसत्कर्मसाक्षिणे ब्रह्मणे नमः ॥
> गृह्यसूत्रार्थमालोक्य छन्दोगानामियं क्रमात् ।
> कृता श्रीभवदेवेन कर्मानुष्ठानपद्धतिः ॥

तत्र सर्वकर्मणां मूलभूता कुशण्डिका लिख्यते । तत्रोभयतश्चतुर्हस्तप्रमाणं भूदेशं शर्कराङ्गारास्थिकेशतुषादिरहितं पूर्वोत्तरप्रवं समं वा छायामण्डपसहितं गोमयेनोपलिप्य स्नातः शुचिराचान्तः प्राङ्मुखः कुशसहितासनोपविष्टः कर्ता उत्तरस्यां दिशि अभ्युक्षणार्थं कुशसहितं जलपात्रं निधाय दक्षिणजानु भूमौ पातयित्वा सव्यहस्तप्रादेशं वह्निस्थापनपर्यन्तं भूमौ निधाय दक्षिणहस्तगृहीतकुशमूलेन स्वाङ्गुष्ठपरिमितेन द्वादशाङ्गुलप्रमाणां प्राङ्मुखीं पृथिवीदेवताकां रेखामुल्लिख्य पीतवर्णां ध्यायेत् । तन्मूलतः प्रभृत्येकविंशत्यङ्गुलप्रमाणामुत्तराभिमुखीमग्निदेवताकां रेखामुल्लिख्य लोहितवर्णां ध्यायेत् । ततः प्रथमरेखातः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्वाभिमुखीं प्रजापतिदेवताकां रेखामुल्लिख्य कृष्णवर्णां ध्यायेत् । ततो ऽपि सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्वाभिमुखीमिन्द्रदेवताकां रेखामुल्लिख्य नीलवर्णां ध्यायेत् । ततः सप्ताङ्गुलान्तरितां प्रा० पू० सोमदेवताकां रे० शुक्लवर्णां ध्यायेत् । ततः क्रमेण रेखातत्सकरं (!) गृहीत्वा ऐशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रजापतिर्ऋषिरग्निर्देवता उत्करादिनिरसने विनियोगः ॥०

इति सर्वकर्मसाधारणी कुशण्डिका fol. 6; इति सर्वकर्मसाधारणमुदीच्यं कर्म समाप्तं । अथ विवाहकर्माभिधीयते fol. 10*b*; इति पाणिग्रहणं समाप्तं fol. 21*b*; इति गर्भाधानं समाप्तं fol. 28; इति पुंसवनं fol. 30; इति सीमन्तोन्नयनं fol. 33; इति जातकर्म fol. 34*b*; इति निष्क्रमणं fol. 35*b*. इति नामकरणं fol. 37*b*; इति पौष्टिकं fol. 38; इत्यन्नप्राशनं fol. 39*b*; इति पुत्रमूर्धाभिघ्राणं fol. 40*b*; इति चूडाकरणं fol. 43*b*; इत्युपनयनं fol. 49*b*; इति सावित्रव्रतः fol. 52; इति समावर्तनकर्म fol. 56.

It ends: इति शालाकर्म समाप्तं ॥ इति श्रीभट्टश्रीभवदेवकृता छन्दोगानां दशकर्मपद्धतिः समाप्ता ॥

[H. T. COLEBROOKE.]

## 453.

**639b.** Foll. 32; size 16 in. by 5 in.; fairly written, in Bengālī; eight lines in a page.

Another copy of the same treatise.

It ends: इति श्रीभवदेवभट्टकृतायां छंदोगपद्धतौ दशकर्मपुस्तकं समाप्तं ॥ शकाब्दाः १७२९ ॥

An incomplete MS. of this treatise, containing only the general part, has already been noticed under No. 394.

[H. T. COLEBROOKE.]

## 454.

**353A.** Foll. 53; size $10\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; well written, in the Devanāgarī character; nine or ten lines in a page.

*Chandogāhnikapaddhati*, a treatise on common daily observances, by *tripāṭhin Rāmakrishṇa.*

The first two leaves of the original MS. are wanting, but have been supplied (though apparently imperfectly) by a later hand.

It begins:

> अपकृष्य च विण्मूत्रं काष्ठलोष्टतृणादिना ।
> गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृते जलैः ॥

*Atha ācamanavidhiḥ*, fol. 2; *dantadhāvanavidhiḥ*, fol. 3; *prātaḥsnāna*, fol. 3*b*; *gauṇasnāna, saṃkshepa*, fol. 4; *sandhyopāsana*, fol. 5*b*; *aṅgulinyāsa, shaḍaṅganyāsa, praṇavanyāsa, saptavyāhṛitīnām nyāsa*, fol. 6*b*; *gāyatrīvarṇanyāsa, śironyāsa*, fol. 7; *japalakshaṇam*, fol. 8*b*; *japamālālakshaṇam*, fol. 9; *japanishedha, sandhyāyā*

*mukhyakālalope prāyaścittavidhi, sūtake sandhyāvidhih,* fol. 9*b*; *sandhyopāsana,* fol. 10; *svastyayana,* fol. 13; *homavidhi,* fol. 13*b*; *devapūjā,* fol. 15*b*; *navagrahapūjā,* fol. 18; *maṅgalāvekshaṇa* fol. 21*b*; *abhivādana, nityadāna,* fol. 22; *adhyayanarūpasya brahmayajña,* fol. 22*b*; *yogakshema,* fol. 23*b*; *madhyāhnasnāna,* fol. 24; *snānāṅgatarpaṇa,* fol. 29; *snānāṅgatarpaṇānantaravidhi,* fol. 33*b*; *vastraparidhānavidhi, tilakavidhi,* fol. 34; *madhyāhnasandhyopāsana,* fol. 34*b*; *sūryopasthāna,* fol. 35*b*; *japarūpa-brahmayajñavidhi,* fol. 36; *rudropasthāna,* fol. 36*b*; *tarpaṇavidhi,* fol. 37; *pañcamahāyajñavidhi, vaiśvadevavidhi,* fol. 41; *manushyayajñavidhi,* fol. 45; *nityaśrāddha,* fol. 46; *anukalpavidhi yogrīsavidhi,* fol. 47*b*; *bhikshādāna, bhojanavidhi,* fol. 48; *purāṇādiśravaṇa, agneh prādushkaraṇa, sāyaṃsandhyopāsana,* fol. 50*b*; *sāyaṃhoma, sāyam-vaiśvadeva,* fol. 51; *sāyam-bhojana, śayanavidhi,* fol. 51*b*; *stryabhigamana,* fol. 52.

Dated Saṃvat 1780. For a Berlin MS. of the work, see Weber's Catalogue, No. 330.

[H. T. COLEBROOKE.]

## 455.

**1722b.** Foll. 19; size $8\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī; nine lines in a page.

*Chandogānīyāhnika,* a shorter treatise on the same subject, by *Śivarāma,* son of *Viśrāma.*

It begins:

प्रणम्य तातं विश्राम्यं (!) विघ्नेशं जगदंबिकां ।
ब्रह्मण्यमाश्रितं यत्र प्रातःकृत्यादिकर्मणि ॥ १ ॥
विधिं तस्य प्रवक्ष्यामि छंदोगानां हिताय वै ।
शिष्याणामुपकाराय तथा च विदुषां मुदे ॥ २ ॥

ब्राह्मे मुहूर्ते उत्थाय श्रीपरमेश्वरं स्मृत्वा यथावन्मूत्रपुरीषोत्सर्गं कृत्वा क्षालितकरचरणः प्राङ्मुखोदङ्मुखो वोपविश्याचामेत् । ०

इति प्रातःसंध्या fol. 5; इति मध्याह्नसंध्या fol. 7*b*; इति देवपूजाप्रयोगः fol. 8*b*; इति (पंचयज्ञानां) निर्णयः । अथ प्रयोगः fol. 13; इति वैश्वदेवः fol. 16; इति पंच महायज्ञाः fol. 17; इति भोजनविधिः fol. 18*b*.

It ends: इति सायंसंध्या ॥ इति विद्वज्जननीराजितचरणकमलभ्युक्तश्रीविश्रामात्मजशिवरामविरचितं छंदोगानीयाह्निकं समाप्तिमगात् ॥ संवत् १८१० चैत्रकृष्णद्वादशीबुधवासरे ॥

[H. T. COLEBROOKE.]

## 456.

**1153a.** Foll. 176; size $9\frac{1}{4}$ in. by 4 in.; legibly written in Devanāgarī; ten or eleven lines in a page.

*Bahvricāhnika,* an anonymous compilation of directions regarding the daily observances of a Brāhman.

It begins:

प्रणम्य शिरसा देवं देवगणपतिं तथा ।
बह्वृचानां हितार्थाय लिख्यते चाह्निको विधिः ॥

अथेदानीं सुप्तोत्थिताद्यारभ्य शयनपर्यंतमाह्निकं कर्मोच्यते । तत्र मनुः । नामुत्र हि सहायार्थं पिता माता च तिष्ठतः । ०

It ends: आपस्तंभः (!) । कामं भर्तुरनुज्ञया व्रतोपवासादीनारभेत् ॥ २० ॥ नारी भर्तुरनुज्ञाता पिता भ्राता सुतेन वा । विफलं तद्भवेत्तस्य यत्करोति व्रतादिकमिति ॥

इति स्त्रीगमनविधिः ॥ इति बह्वृचाह्निकं संपूर्णं ॥ संवत १७७९ वैशाखकृष्ण ८ गुरौ लिखितमिदं पुस्तकं ॥

Then follow a page and a half of quotations on bathing, from *Smritisāra, Karmapradīpa, Manu* and *Vishṇu;* breaking off abruptly at the end of the leaf. [H. T. COLEBROOKE.]

## 457.

**1607.** Foll. 322; size $9\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; fairly well written, in Devanāgarī; nine lines in a page.

*Krityacintāmaṇi,* a compendium of domestic rites, compiled, in accordance with the *Gobhilīya-Grihyasūtra,* by *Śivarāma,* son of *Viśrāma,* in Śaka 1562 (A.D. 1640).

It begins:

श्रीविघ्नेशमशेषमङ्गलभुवं श्रीशारदां सारदां
नत्वा वेदविदां वरं च जनकं श्रीशुक्लविश्रामकं ।
गाढाज्ञानतमोऽपहं कृताधियां श्रीसामगानां कृते
कुर्वेऽहं कृपया गुरोः सुरुचिरं श्रीकृत्यचिन्तामणिं ॥ १ ॥
वन्दे श्रीगणनायकं त्रिनयनं रक्ताम्बरैरावृतं
पाशेणाङ्कुशदन्तपाणिममरं चन्द्रार्धमौलिं सदा ।
वन्द्यं सिद्धिसुरासुरैर्मुनिगणैः संस्तूयमानं मुदा
यं वै वेदविदो नमन्ति सकलारम्भेषु सिद्धिप्रदं ॥ २ ॥
आचार्यं गोभिलं नत्वा दृष्ट्वा तत्सूत्रमादरात् ।
कृत्यचिन्तामणिं वक्ष्ये गुरूणां सुप्रसादतः ॥ ३ ॥

लाट्यायनादिभिरुक्तानि श्रौतानि कर्माणि स्मार्तानि कथयन्नाह भगवान्गोभिलः ॥ अथात इति ॥ अथशब्दस्य मङ्गलत्वं स्मृतिसिद्धं । ०

Fol. 48: इति ० कृत्यचिंतामणौ आधानप्रकाशः प्रथमः समाप्तः ॥

जगन्मयस्वरूपाया नौमि पादांबुजद्वयं ।
यं नमंत्यखिला देवा नानोपायनपाणयः ॥

पूर्वमुपवीतिना कर्म कर्तव्यमित्युक्तत्वादुपवीतस्वरूपमाह । यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वापि वा कुशरज्जुमेव (*Gobh. Gṛihya-sūtra*, I. 2, 1) ॥ ०

Fol. 96: इति ० आह्निकप्रकाशो द्वितीयः समाप्तः ॥
तातं प्रणम्य विश्रामं विघ्नेशं जगदंबिकां ।
प्रारभ्यते च तार्तीयः प्रकाशः सर्वसंमतः ॥

प्रथमप्रकाशे सूत्रक्रमेण निरूपितं स्मार्ताग्न्याधानं द्वितीये च आधानानंतरं सन्निहितं तत्वान्निरूपिताः सायंप्रातर्होमपंचयज्ञाः ॥ अतः परं सूत्रक्रमेण वक्तव्यः पक्षादिस्थालीपाकस्तस्य च पिंडपितृयज्ञपार्वणश्राद्धपूर्वकत्वात्तयोरमावास्यायामनुष्ठेयत्वाद्दर्शपूर्णमासयोः स्वरूपकथनमंतरेणानुष्ठानासंभवादादौ तयोः स्वरूपं निरूपयितुमाह आचार्यः । अथ दर्शपूर्णमासयोः (*Gobh. Gṛihyasūtra*, I. 5, 1).

The leaves 107 *seq.* seem to be in a state of confusion, the volume being apparently made up of two or three different copies of the work; foll. 107–194 (wrongly inserted ?) and 195–279 being also paged separately.

Fol. 108: कालमाह । अमावास्यायां तच्छ्राद्धं (? *sūtra*) ॥

Fol. 190: इति ० आधानप्रकाशः प्रथमः ॥

Fol. 233*b*: इति विवाहादिचतुर्थीकर्मांतकर्मनिर्णयः ॥ अथ सूत्रक्रमप्राप्तो गर्भाधानादिनिर्णयः । तत्राह । ऊर्ध्वं त्रिरात्रात्संभव इत्येके (*Gobh.* I. 5, 7) ॥

End of the third chapter not found.

Fol. 273: इति ० संस्कारप्रकाशश्चतुर्थः समाप्तः ॥
तातं प्रणम्य विश्रामं सारदां सारदां शिवां ।
सूत्रक्रमेण वक्ष्ये हमुपाकर्मादिनिर्णयं ॥ अथापाकर्मनिर्णयः । ०

It ends: इति काम्यकर्मादिशांतिप्रयोगः समाप्तः ॥ समाप्तश्चायं ग्रंथः ॥

यस्याः प्रसादलाभेन निबंधो यं मया कृतः ।
परिश्रमेण मे देवी प्रीता भवतु सर्वदा ॥ १ ॥
पक्षतुशरचंद्रैश्च मिते शाके तु वत्सरे ।
मुन्यंकसम्मिते नभोमासि पक्षे सितेतरे ॥ २ ॥
जन्माष्टम्यां गुरोर्वारे शुक्ले विश्रामसूनुना ।
शिवरामेण रचितः कृत्यचिंतामणिः शुभः ॥ ३ ॥ ० ७ ॥

इति विद्वन्मुकुटमाणिक्यनीराजितचरणकमलशुक्लश्रीविश्रामात्मजशिवरामरचिते कृत्यचिंतामणौ पाकसंस्था पंचमः प्रकाशः समाप्तः ॥ समाप्तो यं कृत्यचिंतामणिः संवत् १८६१ ०

[H. T. COLEBROOKE.]

## 458.

**1667c.** Foll. 29; size 9 in. by 4 in.; legibly written, in Devanāgarī, about the beginning of last century; eleven lines in a page.

A portion of the same work. The first chapter, chiefly on *ādhāna*; incomplete.

इति प्रायश्चित्तनिरूपणं ॥ अथ आधानविधिनिर्णयः fol. 28*a*.

[H. T. COLEBROOKE.]

## 459.

**1636c.** Foll. 29; size 9 in. by 4¼ in.; fairly written, in the Devanāgarī character; foll. 1–5*a* by a different hand from the rest; 9–12 lines in a page. Modern.

*Ṛigveda-(Sapta)saṃsthāprayoga*, a manual for the performance of certain domestic rites.

The treatise begins:

नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकम् ।
क्रियते ह्युपकारायावशिष्टा सप्तसंज्ञका ॥

श्रवणाकर्माद्या इत्यर्थः ॥ इदानीं श्रवणाकर्माद्या(ः) समावशिष्टा उच्यन्ते । तत्र तावच्छ्रवणाकर्मोच्यते । श्रवणाकर्म सर्पबलिं च भुक्त्वापि केचित्कुर्वन्ति । युक्तं तूपवासिनैव कार्यं इति । श्रावण्यां पौर्णमास्यां पूर्वाह्णे वृद्धिश्राद्धं कृत्वा दिवैव यवानां व्रीहीणां वा लौकिकाग्नौ प्रस्थमितानां भर्जनेन धानाः कृत्वाऽखण्डितव्रीह्यन्यतरस्य लौकिकाग्नौ भर्जनं कृत्वा तत्पिष्टैः सक्तुभिर्नवं कलशं प्रपूर्य बलिनिक्षेपसाधनभूतां वैकङ्कतदर्वीमपि संपाद्य तदुभयं गृहकाष्ठादिलक्षिते नवे शिक्ये निधाय बल्यर्थं गृहप्राच्यां शुचिदेशं परिगृह्णीयादिह करिष्यामीति ।°

*Śravaṇākarman* ends fol. 4; *sarpabali*, fol. 5; *āśvayujīkarman*, fol. 6; *āgrayaṇa*, fol. 7*b*; *pratyavarohaṇa*, fol. 12*b*; *anāhitāgneḥ piṇḍapitriyajñavyatishaṅga-śrāddha*, fol. 23; and the *ashṭakā* [this last portion being subdivided into *saptamīśrāddha*, fol. 24; *ashṭamīśrāddha*, fol. 25*b*; *anvashṭakyākhyaśrāddha*, fol. 28*b*; (*ashṭakāvikritibhūta-*)*madhyāvarsha*; (*pratimāsam-*)*aparapakshaśrāddha*]. [H. T. Colebrooke.]

## 460.

**2663a.** Foll. 30; size 9¾ in. by 4½ in.; fairly written, in the Devanāgarī character, in the earlier part of last century; 7–10 lines in a page.

*Karmapradīpa*, a metrical treatise on domestic rites, intended as a supplement to the rules of *Gobhila*.

The treatise, which consists of little short of five hundred *ślokas*, in three *prapaṭhakas* of ten *kaṇḍikās* each, is usually ascribed to *Kātyāyana;* and has been printed in India as the *Kātyāyana-Smṛitiśāstra*.

It begins:

अथातो गोभिलोक्तानामन्येषां चैव कर्मणां ।
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् ॥
त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतं ।
त्रिवृच्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥°

The second *prapāṭhaka* begins fol. 8*b*:

अत ऊर्ध्वं प्रवक्ष्यामि संध्योपासनकं विधिं ।
अनर्हः कर्मणां विप्रः संध्याहीनो यतः स्मृतः ॥

The third *prapāṭhaka* begins fol. 19:

असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं हि भवेद्धुतमनर्थकं ॥
विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते ॥

[Gaikawar.]

## 461.

**41a.** Foll. 22; 4to, size 10½ in. by 8 in.; Bengālī character; European paper (water-mark 1805); 15–19 lines in a page.

Another copy of the same treatise.

[H. T. Colebrooke.]

## 462, 463.

**530, 1700.** Foll. 358, out of which four (32, 52, 303, 316) are missing; size 10½ in. by 4 in.; good large Devanāgarī handwriting of about the beginning of the 16th century; eight lines in a page. Some pages (143*b*, 148*b*, 179*a*, 199*a*, 229*a*, 239*a*, 240*a*, 297*a*) have been left blank. The MSS., especially the first volume (foll. 1–190), have suffered from damp.

*Karmapradīpa*, with a commentary (*bhāshya*) by *Miśra Āśāditya* (or *Āśārka*), son of *Cakradhara*. It begins:

ध्यात्वा विश्वस्य बीजं प्रणवमयमिह प्राप्तिहेतोः फलानां
कर्म ब्रह्मेश्वरब्रह्मभृति(?)निजसमुद्भूतभेदं मुनीनां ।
विच्छित्यै कर्मदीपप्रवरविवरणं ध्वंसिविघ्नस्य नित्यं
कर्तव्यं तोषकारि प्रवरतरधियां शास्त्रमाशार्कनाम्ना ॥ १ ॥
तं बादरायणं नौमि यो ऽसौ जैमिनये ददौ ।
कर्मकांडं परं सामगायिनामभिकांक्षितं ॥ २ ॥
जैमिनिं मुनिशार्दूलं मूलं साम्नां सगोभिलं ।
नत्वा कर्मप्रदीपार्थविचारः क्रियते मया ॥ ३ ॥

[14. *Advaitākhyaṃ* tritīyaṃ prakaraṇam (*ib.* p. 447), fol. 23 : उपासनाश्रितो धर्मो°

[15. *Alātaśāntākhyaṃ* caturthaṃ prakaraṇam (*ib.* p. 513) begins fol. 25 : ज्ञानेनाकाशकल्पेन °; ends इत्युपदेशमंथे अलातशांताख्यं प्रकरणं समाप्तं । अथर्ववेदे पंचदशोपनिषत्समाप्ता ॥

16. *Nīlarudropanishad*, in 3 *khaṇḍa*, fol. 28*b* :
अपश्यं चावरोहं तं दिविचः पृथिवीमयः ।
अपश्यमपश्यं तं रुद्रं (!) नीलग्रीवं शिखंडिनं ॥
दिवि उग्रोतिवारूढत् । (!) प्रतिष्ठा भूम्यामपि ।
जनासः पश्यत महत् नीलग्रीवं विलोहितं ॥
एष एत्य वीरहा (!) रुद्रो जलाशभेषजीः ।
विश्वे क्षेममनीनशद्यातीकारो प्येतु ते (!) ॥

17. *Nādabindūpanishad*, fol. 29 :
अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारस्तस्य पुच्छं वा अर्धमात्रा शिरस्तथा ॥ °

18. *Brahmabindūpanishad*, fol. 30 :
मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च । °

19. *Amritabindūpanishad*, fol. 30*b* :
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः । °

20. *Dhyānabindūpanishad*, fol. 32 :
योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
तच्छ्रुत्वा ° ॥ विष्णुर्नाम ° । तत्त्वमार्गे ° ॥ यदि शैलसमं पापं ° ।

21. *Tejobindūpanishad*, fol. 33 :
तेजोबिंदुः परं ध्यानं विश्वातीतं हृदि स्थितं । °

22. *Yogaśikshopanishad*, fol. 33*b* :
योगशिक्षां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमां ।
यदा तु ध्यायते मंत्रं गात्रकं यो ऽभिजायते ॥ °

23. *Yogatattvopanishad*, fol. 33*b* :
योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया । °
Same two *ślokas* as in 20 ; then
यः स्तन्यं पूर्वपीत्वा (!) निष्पीड्य च पयोधरान् । °

24. *Sannyāsopanishad*, fol. 34 : अथाहिताग्निर्वियेत प्रेतस्य मंत्रै संस्कारोपनिषत्त °

25. *Āruṇi-upanishad*, fol. 35*b* : आरुणिः प्रजापतेर्लोकं जगाम । तं गत्वोवाच केन भगवन्कर्माण्यशेषतो विसृजामीति °

26. *Kaṇṭhaśrutyupanishad*, fol. 36 : यो ऽनुक्रमेण संन्यसति स संन्यस्तो भवति को ऽयं संन्यास उच्यते कथं संन्यस्तो भवति य आत्मानं क्रियाभिः सुगुप्तं करोति मातरं °

27. *Piṇḍopanishad*, fol. 37*b* :
देवता ऋषयः सर्वे ब्रह्माणमिदमब्रुवन् ।
मृतस्य दीयते पिंडं कथं गृह्णंत्यचेतसः ॥
भिन्ने पंचात्मके देहे गते पंचसु पंचधा ।
हंसस्त्यक्त्वा गतो देहं कस्मिन्स्थाने प्रतिष्ठितः ॥
ब्रह्मोवाच । त्र्यहं वसति तोयेषु त्र्यहं वसति चाग्निषु । °

28. *Ātmopanishad*, in three *khaṇḍa*, fol. 38 : अथैवांगिरास्त्रिविधः पुरुषः तद्यथा बाह्यात्मांतरात्मा परमात्मा चेति °

29. *Nṛisiṃha-pūrvatāpanīye Mahopanishat prathamā*, fol. 38*b*.

[30. *Nṛisiṃhapūrvatāpanīye Mahopanishat dvitīyā*, fol. 40*b*.

[31. *Nṛisiṃhapūrvatāpanīye Mahopanishat tṛitīyā*, fol. 42*b*.

[32. *Nṛisiṃhapūrvatāpanīye Mahopanishac caturthā*, fol. 43.

[33. *Nṛisiṃhapūrvatāpanīye Mahopanishat pañcamā*, fol. 44*b*.

34. *Nṛisiṃhottaratā-panīyopanishad*, fol. 46.

35. *Kaṭhavally-upanishad*, fol. 53*b*.

36. *Kaṭhavally-upanishad Uttaravallī*, fol. 56*b*

37. *Keneshitopanishad* (*Talavakāropanishad*), fol. 58*b*.

38. *Nārāyaṇopanishad*, fol. 59 : अथ पुरुषो ह वै नारायणो ऽकामयत प्रजाः सृजेय इति °

39. *Bṛihannārāyaṇopanishat* (=*Mahānārāyaṇopanishad*) *pūrvā* (11 sections), fol. 60*b* : अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् । ° *Taitt. Ār.* x. 1–14.

40. *Bṛihannārāyaṇopanishat uttarā* (10 sections), fol. 65 : घृणि(:)सूर्य आदित्यमर्चयंति तपः सत्यं मधु क्षरंति । तद्ब्रह्म तदाप आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरों ॥ सर्वो वै रुद्रस्तस्मै रुद्राय ° *Taitt. Ār.* x. 15–63.

41. *Sarvopanishatsāra*, fol. 69 : कथं बंधः कथं मोक्षः का अविद्या का विद्येति °

42. *Haṃsopanishad*, fol. 70*b* :
भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद । °

43. *Paramahaṃsopanishad*, fol. 71*b* : अथ योगिनां परमहंसानां को ऽयं मार्गस्तेषां का स्थितिरिति नारदो °

44. *Ānandavallyupanishad* (7th and 8th *prap.* of *Taitt. Ār.*), fol. 72.

45. *Bhriguvallyupanishad* (9th *prap.* of *Taitt. Ār.*), fol. 76.

46. *Gāruḍopanishad*, fol. 77*b* : ब्रह्मविद्यां प्रवक्ष्यामि ब्रह्मा नारदाय नारदो °

47. *Kālāgnirudropanishad*, fol. 78 : अथ कालाग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छाधीहि °

48. *Rāma-pūrvatāpanīyopanishad*, fol. 78*b* :
चिन्मये ऽस्मिन्महाविष्णौ जाते दशरथे हरौ । °

49. *Rāmottaratāpanīyopanishad*, fol. 82 : बृहस्पतिरुवाच याज्ञवल्क्यं । यदनु कुरुक्षेत्रं °

50. *Kaivalyopanishad*, fol. 85.

51. *Jābālopanishad*, fol. 86 : [बृहस्पतिरुवाच] याज्ञवल्क्यं यदनु कुरुक्षेत्रं °

52. *Āśramopanishad*, fol. 87*b* : अथातश्चत्वार आश्रमाः षोडश भेदा भवति । तत्र ब्रह्मचारिणश्चतुर्विधा भवंति ° four *khaṇḍa*.

The collection ends :
द्विपंचाशत्संख्योपनिषद्ग्रंथः समाप्तः॥ पंचदशोपनिषदो भवंति शौनकीयानां । मुंडकादिस्वङातांता विज्ञेया ब्रह्मवेदस्य ॥
सप्तत्रिंशत्तथान्याश्च पैप्पलादिप्रभेदतः ।
एवं पंचाशदद्व्यधिका ब्रह्मवेदस्य नान्यतः ॥
नीलरुद्रप्रभृतय आम्नाताः प्रकीर्तिताः ।
एताः सर्वाः पृथग्वाक्या जीवब्रह्मैक्यबोधिकाः ॥
इत्यथर्ववेदोपनिषद्ग्रंथः समाप्तः ॥

[H. T. Colebrooke.]

## 490.

**1686b.** Foll. 72; size 9½ in. by 4 in.; Devanāgarī character, written about the middle of the 17th century; 9–11 lines in a page. The writing has become almost illegible through wear in many places.

Another collection of *Upanishads*.

1. *Tripuri-upanishad* begins : ओंशब्दस्पर्शरूपरसगंधविषयाः पंच पृथिव्यादयश्च परमात्मनः समुत्पन्नाः । तस्मादेतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । °

2. *Brahmopanishad*, fol. 5 : अथास्य पुरुषस्य चत्वारि स्थानानि भवंति । °

3. *Taittirīyopanishad*, fol. 7*b*.

4. *Mahā*(or *Vṛihad*)-*Nārāyaṇopanishad* (also called *Yājñikī-upanishad*, fol. 17*b* : अंभस्य पारे भुवनस्य मध्ये ° See preceding MS., *Up.* 39 and 40.

5. *Kenopanishad* (*Talavakāropanishad*) fol. 40.

6. *Muṇḍakopanishad*, fol. 42.

7. *Praśnopanishad*, fol. 47.

8. *Rudropanishad* (or *Atharvaśiro-rudropanishad*), fol. 53 : ओं नमः शिवाय ॥ देवा ह वै स्वर्गं लोकमायंस्ते रुद्रमपृच्छन् को भवानिति °

9. *Kālāgnirudropanishad*, fol. 59 : संवर्तको ऽग्निर्ऋषिः। विश्वरूपी रुद्रा [दे]वता अनुष्टप् छंदः। रुद्रप्रत्यर्थे जपे विनियोगः। कालाग्निरुद्रं भगवंतं सनत्कुमारं पप्रच्छ °

10. *Nārāyaṇopanishad*, fol. 60 : अथ पुरुषो ह वै नारायणो ऽकामयत प्रजाः सृजेयेति । °

11. *Hamsopanishad*, fol. 61 : अथ हंसपरमहंसनिर्णयं व्याख्यास्यामः । ब्रह्मचारिणे दांताय । गुरुभक्ताय हंसहंसेति सदायं देहेषु व्याप्तो °

12. *Kaivalyopanishad*, fol. 62.

13. *Mahopanishad*, fol. 64 : अथातो महोपनिषदमेव । तदाहुरेको ह वै नारायणः । °

14. *Ātmabodhopanishadaḥ*, fol. 65 : हरिः। ओं। प्रत्यगानंदब्रह्मपुरुषं। प्रणवस्वरूपं । °

15. *Paiṅgalopanishad*, fol. 65*b* : अथ हैनं पैंगलः पप्रच्छ याज्ञवल्क्यः । किं कर्म का च स्थितिः । स होवाच याज्ञवल्क्यं। समानि वोदि (!) संपन्नो मुमुक्षुरेकविंशति तारयति । चंद्रवच्चरं मेद देहि विमुक्तः °

16. *Garbhopanishad*, fol. 66 :

पंचात्मकं पंचसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तं। °

17. *Gāruḍopanishad*, fol. 68 : ओं नमो भगवते नवगरुडाय विष्णुवाहनाय त्रैलोक्यपरिप्रजिताय वज्रनखवज्रतुंडाय । वज्रपक्षाय कृतशरीराय । एहि एहि एहि महागरुड । दुष्टविषं छिंधि छिंधि आवेशय आवेशय । दुष्टराक्षसविषं छिंधि छिंधि । ब्रह्मविद्यां प्रयच्छामि । ब्रह्म नारदाय नारदो बृहत्सेनाय बृहत्सेनो इंद्राय इंद्रो ° See p. 111*b*, *Up*. 49; Weber, *Ind. Stud.* xvii. p. 161.

18. *Kaṭhopanishad*, fol. 68.

19. *Māṇḍūkyopanishad*, fol. 69*b*.

20. *Kenopanishad* (as above, *Up*. 7), fol. 70*b*.

[H. T. Colebrooke.]

## 491.

**1972.** Size 8½ in. by 4 in.; well written, in the Devanāgarī character, by different recent hands; generally nine lines in a page.

Another collection of *Upanishads*.

1. Foll. 1–5 : *Kālāgnirudropanishad*, with a commentary (*dīpikā*) by *Nārāyaṇa*.

The *Upanishad* begins : अथ कालाग्निरुद्रं सनत्कुमारः पप्रच्छ। °

The commentary begins :

कालाग्निरुद्रोपनिषद्विष्वंडाथर्वपाठिनां ।
पंचचत्वारिंशत्तमे त्रिपुंड्रविधिनिर्णयः ॥

अस्य श्रीकालाग्निरुद्रोपनिषदः संवर्तको ऋषिः विश्वरूपो °

It ends : नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपदवाक्यानां कालाग्निरुद्रदीपिका॥

2, 3. *Cūlikopanishad*, but here, together with the *Yogaśikhā*, called *Mantrikopanishad*, begins fol. 6*b* (*cf*. p. 118*b*) :

अष्टपादशुचिं हंसं त्रिसूत्रमणुमव्ययं।
त्रिवृत्मंतं तेजसो हंसं सर्वतः पश्यन्न पश्यति (!) ॥
भूतसंमोहने काले भिन्ने तमसि वैरवे । °

It ends fol. 7*b* : लीनाश्चाव्यक्तशालिन इति॥ अथ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमां। °

It ends : तदा पश्यंति योगेन संसारोच्छेदनं महत् । संसारोच्छेदनं महदिति ॥ इति अथर्ववेदे मंत्रिकोपनिषत्समाप्ता ॥

4. (*Laghu-*)*Jābālopanishad*, in 5 paragraphs, fol. 9 : लघुजाबालोपनिषद्प्रारंभः॥ बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं °

It ends : देहत्यागं करोति स परमहंसो नाम स परमहंसो नामेति॥ इति जाबालोपनिषत्समाप्ता ॥

5–9. *Pañca-Atharvaśirshopanishadaḥ* :

*a*) *Gaṇapatyatharvaśīrsha*, fol. 12*b* : ओं स ह नाववतु । स ह नौ भुनक्तु। स ह वीर्यं करवावहै । ° ends : गणपतिअथर्वशीर्षं समाप्तं ॥

*b*) *Nārāyaṇopanishad*, fol. 13*b* : अथ पुरुषो ह वै नारायणो ऽकामयत प्रजाः सृजेयेति ° ends : ° श्रीनारायणसायुज्यमवाप्नोति ॥ इत्युपनिषत्॥

*c*) *Śivātharvaśīrshopanishad*, fol. 16*b* : देवा ह वै स्वर्गं लोकमायन् । ते देवा रुद्रमपृच्छन् । को भवानीति ° ends : अथर्वशीर्षे तृतीयोपनिषत्समाप्ता ॥

*d*) *Sūryātharvaśira*, fol. 17*b* : अथ सूर्याथर्वशिरं व्याख्यास्यामः॥ ब्रह्मा ऋषिः । गायत्री छंदः। ° It ends : इति सूर्यनारायणाथर्वशीर्षं समाप्तं॥ अथर्वशीर्षे चतुर्थोपनिषत्समाप्ता ॥

*e*) *Devyatharvaśira*, fol. 21*b* : सर्वे वै देवा देवीमुपतस्थुः । कासि त्वं महादेवि। साब्रवीदहं ब्रह्मस्वरूपिणी। ° It ends : देवीअथर्वशिरं समाप्तं॥

10. *Gopāla-pūrvatāpanyupanishad*, fol. 26*b* :

सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे । °

It ends : तं यजेत्तं भजेदित्यों तत्सदिति॥ इति श्रीब्रह्मवेदोपकृष्णोपनिषत्सु पूर्वपक्षसमाप्तः ॥

11. *Gopāla-uttaratāpanyupanishad*, fol. 30*b* : विष्णोरर्च्चायां शिलाधीर्गुरुषु (!) न रमति वैष्णवैर्जा-तिबुद्धिर्विष्णो वा वैष्णवानां कलिकमलमथ ते पादतीर्थे बुद्धिर्मनेत नास्ति विष्णोः पुरुषकलुष हे शब्दसामान्यबुद्धिर्विष्णो सर्वेश्वरेशेतदि जरसमधिधैरस्य वा नारकोस एकदा * व्रजस्त्विमः सकामाः °

This *Upanishad* is here divided into twenty sections. It ends : इति श्रीअथर्ववेदे श्रीमद्गोपालोत्तरतापिन्यौपनिषत्समाप्तः ॥ ब्रह्मवेद उपनिषत्समाप्तः ॥

12. *Vāsudevopanishad*, fol. 38 : नमस्कृत्य भगवंतं नारदः सर्वेश्वरं वासुदेवं पप्रच्छ श्रीभगवन्नूर्ध्वपुंड्रं विधिं द्रव्यमंत्रः स्थानादिसहितं मे ब्रूहीति । तं होवाच भगवान्वासुदेवो वैकुंठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचंदनं वैकुंठस्थानादाहृत्य द्वारकायां मया प्रतिष्ठितं चंदनं कुंकुमादिसहितं विष्णुचंदनं ममांगे प्रतिदिनमालिप्तं गो(पी)भिः प्रक्षालनाद् गोपीचंदनमाख्यातं मदंगलेपनं पुण्यं चक्रतीर्थान्तरे स्थितं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति ॥ १ ॥ अथ गोपीचंदनं नमस्कृत्य ° four sections ; it ends : इत्यथर्ववेदे वासुदेवोपनिषत्समाप्तः ॥

13. *Gopīcandanopanishad*, fol. 39*b* : गोपीकानां संरक्षणी कुतः संरक्षणी लोकस्य नरकान्मृत्योर्भयाच्च संरक्षणीचंदनं तुष्टिकरणं च किं नाम तुष्टिकरणं ब्रह्मानंदकारणं य एवं विद्वानेतदाख्यापयेत् ° six sections ; it ends : इति ° गोपीचंदनोपनिषत्समाप्तः ॥

14. [*Hanumadukta-*] *Rāmopanishad*, fol. 42*b* :

सनकाद्यो योगींद्रा अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनुमंतमिदं ब्रुवन् ॥
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनां ।
पुराणेष्वष्टदशसु स्मृतिष्वष्टादशस्वपि ॥ °

It ends : इति हनुमंतोक्तरामोपनिषत्समाप्ता ॥

15. *Rāmopanishad*, fol. 44 : हनुमानुवाच ।

सिंहासने समासीनं रामं पौलस्त्यसूदनं ।
प्रणम्य दंडवद्भूमौ पौलस्त्यो वाक्यमब्रवीत् ॥
रघुनाथ महाबाहो कैवल्यं कथितं मया ।
अज्ञानां सुलभं चैव कथनीयं च सौलभं ॥

श्रीराम उवाच ॥ अथ पंचदंडका ॥ °

It ends: इत्याथर्वणरहस्ये रामोपनिषत्समाप्ता ॥

* Here begins the text of the Calcutta edition.

16. *Yogarājopanishad*, fol. 44*b* :

योगराजं प्रवक्ष्यामि योगिनां योगसिद्धये ।
मंत्रयोगो लयश्चैव राजयोगो हठस्तथा ॥ °

21 *ślokas ;* ends : इति योगराजोपनिषत्समाप्ता ॥

17. *Sundarītāpanyupanishad*, fol. 46 : अथैतस्मिन्नंतरे भगवान् प्राजापत्यं वैष्णवं विलयकारणरूपमाश्रित्य पुरा त्रिधा भगवत्येवमादि सत्यभूर्भुवःस्वरो इमिति त्रीणि पुराणि स्वर्भूपातालानि त्रिपुराणि ह्रैं ब्रह्मात्मकेन ह्रींकारेण ° 8 *kaṇḍikās ;* ends : परां भैरवीं चित्कलां महात्रिपुरादेवीं ध्यायेमहि ध्यानयोगेनैवं सकलपूजनार्चनं वेदेति महोपनिषत् ॥ इत्यथर्ववेदे सुंदरीतापनी समाप्तः ॥

18. *Mrityulāngalopanishad*, fol. 51 : मृत्युलांगलं व्याख्यास्यामो स्य मृत्युलांगलमंत्रस्यानुष्टुप् छंदः । कालाग्निरुद्रो देवता वसिष्ठ ऋषिर्यमो देवता मृत्युपस्थाने विनियोगः । अथातो योगजिह्वा मधुमती वाजिन्यहं ° ends : इति मृत्युलांगलोपनिषद् समाप्ता ॥

19. *Krishṇopanishad*, fol. 52 :

ते होचुस्तं सुराः सर्वे भगवंतं सनातनं ।
नो वयमवतारा वै गृह्यते नैव भूतले ॥

आज्ञया ° 27 *ślokas ;* ends : इति कृष्णोपनिषध समाप्तं ॥

20. *Krishṇa-purushottama-siddhāntopanishad*, fol. 54 :

निरंजनो निराख्यातो निर्विकल्पो नमो नमः ।
पूर्णानंदो हरिस्तस्मात् मायारहितः पुरुषोत्तमः ॥
अष्टावष्ट सहस्रे द्वे °

It ends : श्रीकृष्णभगवान् नारायणपरमात्मा पुरुषोत्तमः त्रिगुणरहितः स्वयं । कथं परुष एवेदं सर्वं ॥ श्रीकृष्णपुरुषोत्तमसिद्धांतउपनिषत्समाप्ता ॥

21. *Brahmopanishad*, fol. 56*b* : अथास्य पुरुषस्य चत्वारि स्थानानि भवंति । नाभिर्हृदयं कंठो मूर्धा च । °

22. *Haṃsopanishad*, fol. 58*b* : अथ हंसपरमहंसनिर्णयं व्याख्यास्यामो ब्रह्मचारिणे दांताय गुरुभक्ताय हंस हंसेति सदायं । °

23. *Paramahaṃsopanishad*, fol. 60 : अथ योगिनां परमहंसानां मार्गेस्तेषां का स्थितिरिति नारदो भगवंतमुपसमेत्योवाच । °

24. *Áraṇyopanishad,* fol. 62 : स ह नाव ० शांतिः ओं आरुणिः प्रजापतेर्लोकं जगाम तं गत्वोवाच प्रजापते केन भगवन्कर्माण्यशेषतो विसृजानीति ० ends : इति ० आरण्योपनिषत्समाप्ता (!) ॥

[25. *Śaṅkara's Drigdriśyaviveka,* fol. 63 :
दृक्दृशौ द्वौ पदार्थौ स्तः परस्य रविलक्षणौ ।
दृक् ब्रह्म दृश्यं मायेति सर्ववेदांतनिर्णयः ॥ १ ॥ ०
48 *slokas* ; ends : इति शंकरभगवतः कृतौ दृग्दृश्यविवेकः समाप्तः ।

26. *Māṇḍūkyopanishad,* fol. 67*b* : ओमित्येतदक्षरमिदं सर्वं ० ends : इत्यथर्वणशिखायां मांडूक्योपनिषत्समाप्ता ॥

27. *Talavakāropanishad,* fol. 71 : केनेषितं ० ends : केनापरपर्यायतलवकारोपनिषदि चतुर्थः खंडः॥

28. *Kaivalyopanishad,* fol. 73*b* : आश्वलायनो भगवंतं परमेष्ठिनं परिसमेत्योवाच ० ends : ऋक्शाखीयकैवल्योपनिषत्समाप्ता ॥

29. *Subālopanishad,* fol. 76 : स ह नाववतु ० शांतिः॥ तदाहुः किं तदासीत्तस्मै स होवाच । न सन्नासन्न सदसदिति ० 16 *kaṇḍikās* ; ends : शके १७४१ प्रमाथीनामसंवत्सरे दक्षिणायने वर्षा ऋतौ भाद्रपदबहुदशम्यां भौमवासरे ० [DR. JOHN TAYLOR.]

## 492.

**1095A.** Foll. 16 ; size 12½ in. by 4½ in. ; fairly written, in Devanāgarī, in the latter part of the 17th century ; eleven lines in a page.

The text of six of the ancient *Upanishads :*

1. *Īśā* ( *Īśāvāsya,* or *Vājasaneya*)*-upanishad.*
2. *Kena* (or *Talavakāra*)*-upanishad,* begins fol. 2*a*.
3. *Kaṭha*(*valli*)*-upanishad,* fol. 3*b*.
4. *Praśnopanishad,* fol. 8*b*.
5. *Muṇḍakopanishad,* fol. 12*b*.
6. *Māṇḍūkyopanishad,* fol. 16.

[H. T. COLEBROOKE.]

## 493, 494.

**3182, 3183.** Two vols., folio, paged 1–723, 679–1301 resp. ; European paper ; size 12 in. by 7½ in. ; well written, in the Telugu character ; 21–30 lines in a page ; except pp. 676–723 of the first vol., which are in Devanāgarī ; twenty lines in a page.

A collection of "*Upanishads,* known to the *Āndhrika Paṇḍits,* and procured by Sir Walter Elliot, in Telingana, in the years 1850–51." See *Journal of the Asiatic Society of Bengal,* vol. xx. p. 607. At the beginning of vol. i. a list of contents has been inserted, containing the titles in Telugu and Roman letters.

*a.* VOL. I., pp. 1–675.

1. *Īśāvāsyopanishad* begins :
पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शांतिः शांतिः शांतिः ॥ ओं
ईशावास्यमिदᳫं सर्वं यत्किं च जगत्यां जगत् ०

2. *Kenopanishad,* p. 3 : आप्यायंतु ममांगानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिंद्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोद् अनिराकरणमस्त्वनिराकरणं मे । अस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि संतु ते मयि संतु ॥ केनेषितं पतति प्रेषितं मनः ० For the opening benediction, see above, No 135.

3–4. *Kaṭhavallyupanishad,* p. 7 : सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै ओं शांतिः शांतिः शांतिः॥ ओं ॥ उशन् ह वै वाजश्रवसः ०

5. *Praśnopanishad,* fol. 19 : सह नाववत्विति शांतिः ॥ भद्रं कर्णेभिरिति शांतिः ॥ ओं सुकेशा च भारद्वाजः ०

6. *Muṇḍakopanishad,* p. 27 : भद्रं कर्णेभिरिति शांतिः ॥ ओं ॥ ब्रह्म (!) देवानां प्रथमः ०

7–10. *Māṇḍūkopanishad,* p. 35 :
भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः व्यशेम देवहितं यदायुः ॥

स्वस्ति न इंद्रो वृधश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ओं शांतिः शांतिः शांतिः ॥ ओमित्येतदक्षरमिदं सर्वं ° For the benediction see beginning of *Nrisiṃha-tāpanī*, Calcutta edition.

11. *Taittirīyopanishad*, p. 55 : ओं तच्छंयोरावृणीमहे गातुं यज्ञाया । गातुं यज्ञपतये etc. *Taitt. Āraṇy.*, *prap.* 3, followed (from p. 68) by *prap.* 7–10. In the northern texts *prap.* 7–9 are considered as *the Taittirīyopanishad.*

12. *Aitareyopanishad*, p. 115 : वाङ्मे मनसि प्रतिष्ठितं मनो मे वाचि प्रतिष्ठितमाविराविर्म एधि ° *Ait. Ār.* II., adhy. 7 (as benediction?) ; followed by एष पंथा एतत्कर्मैतद्ब्रह्मैतत्सत्यं ° *Ait. Ār.* II., adhy. 1–6. [Acc. to *Śaṅkara*, *Ait. Ār.* II., 4–7 constitute *the Aitareyopanishad.*

13. *Chāndogyopanishad*, p. 135 : आप्यायंतु ममांगानि ° शांतिः ॥ ओमित्येतदक्षरमुद्गीथमुपासीत ° 8 prapāṭhakas (or adhyāyas).

14. *Bṛihadāraṇyakopanishad*, p. 215 : पूर्णमदः ° शांतिः ॥ उषा वा अश्वस्य मेध्यस्य शिरः । ° 8 adhyāyas.

15. *Brahmopanishad*, p. 303 : सह नाववत्विति शांतिः ॥ अथास्य पुरुषस्य चत्वारि स्थानानि भवंति । °

16. *Kaivalyopanishad*, p. 305 : सह ° ॥ अथाश्वलायनो भगवंतं परमेष्ठिनं °

17. *Jābālyupanishad*, p. 309 : पूर्णमद इति शांतिः ॥ बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं °

18. *Śvetāśvataropanishad*, p. 313 : सह ° ॥ ब्रह्मवादिनो वदंति । किं कारणं °

19. *Haṃsopanishad*, p. 323 : पूर्णमद इति शांतिः ॥

ओं भगवंत्सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
ब्रह्मविद्याप्रबोधो हि केनोपायेन जायते ॥
सनत्कुमार उवाच । विचार्य सर्वधर्मेषु मतं ज्ञात्वा पिनाकिनः ।
पार्वत्या कथितं तत्त्वं शृणु गौतम तन्मतं ॥ [किनः ।
अनाख्येयमिदं गुह्यं योगिने कोशसन्निभं ।
हंसस्याकृतिविस्तारं भुक्तिमुक्तिफलप्रदं ॥

अथ हंसपरमहंसनिर्णयं व्याख्यास्यामो ब्रह्मचारिणे दांताय गुरुभक्ताय °

20. *Āruṇikopanishad*, p. 325: आप्यायंतु° शांतिः ॥ ओं ॥ आरुणिः प्रजापतेर्लोकं जगाम । तं गत्वोवाच । केन °

21. *Garbhopanishad*, p. 327 : सह ° ॥ पंचात्मकं पंचसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तं । °

22. *Nārāyaṇopanishad*, p. 331 : सह ° ॥ अथ पुरुषो ह वै नारायणोकामयत । प्रजाः सृजेयेति । °

23. *Paramahaṃsopanishad*, p. 333 : पूर्णमद ° ॥ अथ योगिनां परमहंसानां कोयं मार्गस्तेषां का स्थितिरिति नारदो °

24. *Amṛitabindūpanishad*, p. 335 : सह ° ॥

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितं ॥

[This is the beginning of the *Brahmabindūpanishad* in the northern texts.]

25. *Amṛitanādopanishad*, p. 337 : सह ° ॥

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥

[This is the beginning of the *Amṛitabindūpanishad* in the northern texts.]

26. *Atharvaśiropanishad*, p. 341 : भद्रं ° शांतिः ॥ ओं देवा ह वै स्वर्गं लोकमगमं ते देवा रुद्रमपृच्छन्को भवानिति °

27. *Atharvaśikhopanishad*, p. 347 : भद्रं ° शांतिः ॥ अथ हैनं पैप्पलादोंगिराः सनत्कुमारश्चाथर्वाणमुवाच भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं °

28. *Maitrāyaṇīyopanishad*, p. 349 : आप्यायंत्विति शांतिः ॥ ओं ॥ बृहद्रथो वै नाम राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शरीरं वैराग्यमुपेतो ऽरण्यं निर्जगाम । स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठत्यंते सहस्रस्य मुनेरंतिकमाजगामाग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मविद्भगवाञ्छाकायन्य उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत् । स तस्मै नमस्कृत्योवाच भगवन्नाहमात्मवित्त्वं तत्त्वविच्छृणुमो वयं स त्वं नो ब्रूहीति । एतद्वृत्तं पुरस्तादशक्यं मा पृच्छ प्रश्नमैक्ष्वाकान्यान्कामान् वृणीष्वेति शाकायन्यस्य चरणावभिमृशमानो राजेमां गाथां जगाद ॥ १ ॥ भगवन्नस्थिचर्म °

29. *Kaushītakopanishad*, p. 359 : वाङ्मे मनसीति शांतिः ॥ चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति तं हासीनं पप्रच्छ गौतमस्य पुत्रास्ति संवृतं ° (*cf.* Cowell's ed., p. 3).

30. *Bṛihajjābālopanishad*, p. 379 : भद्रं ° ॥ ओं आपो वा इदमासंत्सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यांतर्मनसि कामः समवर्तत ॥ इदं सृजेयमिति । तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदति तत्कर्मणा करोति । तदेषाभ्यनूक्ता । कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् । सतो बंधुमसति निरविंदन् हृदि प्रतीष्या कवयो मनीषेति । उपैनं तदुपनमति यत्कामो भवति य एवं वेद । स तपो ऽतप्यत । स तपस्तप्त्वा स एतं भुसुंठः (!) कालाग्निरुद्रमगमदागत्य भो विभूतेर्माहात्म्यं ब्रूहीति । तथेति प्रत्यवोचत् । भुसुंठवक्ष्यमानं किमिति । °

31. *Nṛisiṃhapūrvatāpanīyopanishad*, p. 397: भद्रं कर्णेभिरिति शांतिः ॥ ओं ॥ आपो वा इदमासंत्सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यांतर्मनसि कामः समवर्तत । इदं सृजेयमिति ° मनीषेति । उपैनं तदुपनमति यत्कामो भवति य एवं वेद । स तपो ऽतप्यत । स तपस्तप्त्वा स एतं मंत्रराजं नारसिंहमानुष्टुभमपश्यत् । °

32. *Nṛisiṃhottaratāpanīyopanishad*, .p. 411 : (no benediction) देवा ह वै प्रजापतिमब्रुवन्नणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेति । ° The *Pūrva* and *Uttara T.* are counted together as six *upanishads* (31–36) in the list of contents. See Burnell, Index to Tanjore MSS., p. 35*b*.

33. *Kālāgnirudropanishad*, p. 427 : सह ° ॥ अथ कालाग्निरुद्रोपनिषत्संवर्तकाग्निऋषिरनुष्टुप् छंदः । श्रीकालाग्निरुद्रो देवता कालाग्निरुद्रप्रीत्यर्थे जपविनियोगः । अथ कालाग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छाधीहि भगवं त्रिपुंड्रविधिं सतत्त्वं किं द्रव्यं °

34. *Maitreyī-upanishad*, p 431 : आप्यायंत्विति शांतिः ॥ ओं बृहद्रथो वै नाम राजा राज्ये ज्येष्ठं पुत्रं ° [as 28, above] राजेमां गाथां जगाद ॥ १ ॥ अथ किमेतैर्वान्यानां शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं स्थानं वा तरूणां निमज्जनं पृथिव्याः स्थानादवसरणं सुराणां सोऽहमित्येतद्विधे ऽस्मिन्संसारे किं कामोपभोगैर्यैरेवाश्रितस्यासकृदुपावर्तनं (!) दृश्यत इत्युद्धर्तुमर्हसीत्यंधोदपानस्थो भेक इवाहमस्मिंस्संसारे भगवंस्त्वं नो गतिरिति ॥ २ ॥ °

35. *Subālopanishad*, p. 439 : पूर्णमद इति शांतिः ॥ ओं तदाहुः किं तदासीत्तस्मै स होवाच न सन्नासन्न सदसदिति तस्मात्तमः संजायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुः °

36. *Kshurikopanishad*, p. 455 : सह ° ॥ ओं

क्षुरिकं (!) संप्रवक्ष्यामि धारणां योगसिद्धये ।
यां प्राप्य न पुनर्जन्म योगयुक्तस्य जायते ॥ °

37. *Mantrikopanishad*,* p. 457 : पूर्णमद ° ॥

अष्टपादं शुचिं हंसं त्रिसूत्रमणुमव्ययं ।
त्रिवर्त्मानं तेजसोहं सर्वतः पश्यन्न पश्यति (!) ॥ १ ॥
भूतसंमोहने काले भिन्ने तमसि वै खरे (!) ।
अतः पश्यंति सत्त्वस्था निर्गुणं गुणगंहरे (!) ॥ २ ॥
अशक्यः सो ऽन्यथा द्रष्टुं ध्यायमानः कुमारकैः ।
विकारजननीमाज्ञामष्टरूपामजां ध्रुवां ॥ ३ ॥
ध्यायते ऽध्यासिता तेन तन्यते प्रेर्यते पुनः ।
सूयते पुरुषार्थं च तेनैवाधिष्ठितं जगत् ॥ ४ ॥
गौरवाद्यंतवती सा जनित्री (सर्वा) भूतभाविनी ।
सितासिता च रक्ता च सर्वकामदुघा विभोः ॥ ५ ॥
पिबंते नाम विषयामविज्ञाताः कुमारकैः (!) ।
एकस्तु पिबते देवः स्वच्छंदोत्र वशानुगः ॥ ६ ॥
ध्यानक्रियाभ्यां भगवान्भुङ्क्ते ऽसौ प्रसहद्विभुः ।
सर्वसाधारिणीं दोग्ध्रीं पिय्यमानां † तु यज्विभिः ॥ ७ ॥
पश्यंत्यस्यां महात्मानः सुपर्णं पिप्पलाशनं (? MS. पे°) ।
उदासीनं ध्रुवं हंसं स्नातकाध्वर्यवो जगुः ॥ ८ ॥
शंसंतमनुशंसंति बह्वृचाः शास्त्रकोविदाः ।
रथंतरं बृहत्साम सप्तवैद्रुस्तु (!) गिय्यते † ॥ ९ ॥
मंत्रोपनिषदं ब्रह्म पदक्रमसमन्वितं ।
पठंति भार्गवा ह्येते ह्यथर्वाणो भृगूत्तमाः ॥ १० ॥

---

* As a specimen of the southern recension of the *Upanishads* the complete text is given of this tract, otherwise called *Cūlikopanishad.* The numbers of the *ślokas* have been added to facilitate reference to the text editions in Weber's *Ind. Stud.* ix. p. 10 *seq.*; and in the *Ātharvaṇa Upanishads*, p. 129 *seq.* In Burnell's Ind. to Tanjore MSS. it is called *Mantropanishad* (see *śloka* 10.)

† The combination *īy* is almost invariably written *iyy* in Southern MSS. A final *visarga* is also usually assimilated before sibilants.

स ब्रह्मचारी प्रत्यक्षस्तं बोधफलितस्तथा ।
अनड्वान् रोहितोच्छिष्टः पश्यंतो बहुविस्तरे ॥ ११ ॥
कालः प्राणश्च भगवान्मन्युः शर्वो भवश्च ।
रुद्रश्च शरवांस्साधुरस्तथा (!) * ॥ १२ ॥
प्रजापति विराट् चैव पूषाः सलिल एव च ।
स्तूयते मंत्रसंस्तुत्यैरथर्वविधितैर्विभुः ॥ १३ ॥
तं षड्विंशक इत्येके सप्तविंशं तथापरे
पुरुषं निर्गुणं सांख्यामथर्वशिरसो विदुः ॥ १४ ॥
चतुर्विंशतिसंख्यातं व्यक्तमव्यक्तमेव च ।
अद्वैतं द्वैतमित्याहुस्त्रिधा तं पंचधा तथा ॥ १५ ॥
ब्रह्माद्यं स्थावरांतं च पश्यंति ज्ञानचक्षुषः ।
तमेकमेव पश्यंति परिशुभ्रं विभुं द्विजाः ॥ १६ ॥
यस्मिंत्सर्वमिदं प्रोतं ब्रह्म स्थावरजंगमं ।
तस्मिन्नेव लयं यांति स्रवंत्यः सागरे यथा ॥ १७ ॥
यस्मिन्भावाः प्रलियंते लीनाश्चाव्यक्ततां ययुः ।
पश्यंति व्यक्ततां भूयो जायंते बुद्बुदा इव ॥ १८ ॥
क्षेत्रज्ञाधिष्ठितं चैव कारणैर्विद्यते पुनः ।
एवं स भगवां देवं पश्यंत्यन्ये पुनः पुनः ॥ १९ ॥
ब्रह्म ब्रह्मेत्यथायांति ये विदुर्ब्राह्मणास्तथा ।
अत्रैव ते लयं यांति लीनाश्चाव्यक्तशालिनो २० ।

लीनाश्चाव्यक्तशालिन इत्युपनिषत् ॥ पूर्णमद इति शांतिः ॥ मंत्रिकोपनिषत्समाप्ता ॥

38. *Sarvasāropanishad*, p. 459 :

सर्वसारं निरालंबं रहस्यं वज्रसूचकं ।
तेजोनादध्यानविद्यायोगतत्वात्मबोधकं ॥

सह नाववत्विति शांतिः ॥ ओं कथं बंधः कथं मोक्षः काविद्या का विद्येति। जाग्रत्स्वप्न सुषुप्तितुरियं च कथं। अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयकोशाः कथं ।°

See *Sarvopanishatsāra*, above, p. 113*a*.

39. *Nirālambopanishad*, p. 463 : श्रीएकांबरेश्वराय नमः ॥ पूर्णमद इति शांतिः ॥ ओं

एषामज्ञानजंतूनां समस्तारिष्टशांतये (!) ।
यद्यद्बोधव्यमखिलं तदाशंक्य ब्रवीम्यहं ॥

किं ब्रह्म क ईश्वरः को जीवः का प्रकृतिः कः परमात्मा को ब्रह्मा को विष्णुः को रुद्रः क इंद्रः कः शमनः कः सूर्यः कश्चंद्रः के सुराः के असुराः के पिशाचाः के मनुष्याः काः स्त्रियः के पश्वादयः किं स्थावरं के ब्राह्मणादयः का जातिः किं कर्म किमकर्म किं ज्ञानं किं सुखं किं दुःखं कः स्वर्गः को नरकः° कः सन्यासीत्याशंक्याह । ब्रह्मेति च महदहंकारपृथिव्यापस्तेजोवायुराकाशकत्वेन°

It ends : °स मुक्तः स पूज्यः स यागी स परमहंसः सोऽवधूतः स ब्राह्मण इति । निरालंबोपनिषदं योऽधीते गुर्वनुग्रहतः सोऽग्निपूतो भवति स वायुपूतो भवति न स पुनरावर्तते । न स पुनरावर्तते पुनर्नाभिजायते । इत्युपनिषत् । पूर्णमद इति शांतिः ॥

Text (varying considerably), German translation and analysis of this *Upanishad*, by A. Weber, *Ind. Stud.*, xvii. p. 136 *seq.*

40. *Rahasyopanishad*, p. 467 : सह° ॥ ओं अथातो रहस्योपनिषदं व्याख्यास्यामो देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुः । भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति । सोऽब्रवीत् ।

पुरा व्यासो महातेजाः सर्ववेदतपोनिधिः ।
प्रणिपत्य शिवं सांबं कृतांजलिरुवाच ह ॥
श्रीवेदव्यास उवाच ।
देवदेव महप्राज्ञ पाशच्छेद दृढव्रत ।
शुकस्य मम पुत्रस्य वेदसंस्कारकर्मणि ॥°

41. *Vajrasūcikopanishad*, p. 473 : आप्यायंत्विति शांतिः ॥ ओं

वज्रसूचिं प्रवक्ष्यामि शस्त्रमज्ञानभेदनं ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषां ॥

ब्रह्मक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णास्तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपं स्मृतिभिरप्युक्तं तत्र चोद्यमस्ति । को वा ब्राह्मणो नाम । किं जीवः किं देवाः किं जातिः किं ज्ञानं°

42. *Tejobindūpanishad*, p. 475 : सह° ॥

तेजोबिंदु परं ध्यानं विश्वात्मा हृदि संस्थितं ।
अणुनं शांभवं शांतं स्थूलं सूक्ष्मं परं च यत् ॥
दुःखाढ्यं च दुराराध्यं दुष्प्रेष्यं मुक्तमव्ययं ।
दुर्लभं तत्स्वयं ध्यानं मुनीनां च मनीषिणां ॥
यताहारो जितक्रोधो जितसंगो जितेंद्रियः ।
निर्द्वंद्वो निरहंकारो निराशीरपरिग्रहः ॥°

It has the same 14 *ślokas* (though with considerable variations in every line) as those printed in the *Ātharvaṇa Upani-*

* ? Four *aksharas* omitted after मन्युः

*shads*, pp. 29, 30. It does not, however, stop there, but goes on—for 27 pages more (the first 14 *ślokas* occupying one page)—as follows :

यमो हि नियमस्त्यागो मौनं देशश्च कालतः ।
आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥
प्राणसंयमनश्चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् ॥०

It ends :

तेजोबिंदूपनिषदमभ्यसेत्सर्वदा मुदा ।
सकृदभ्यासमात्रेण ब्रह्मैव भवति स्वयमित्युपनिषत् ॥

सह नाववत्विति शांतिः॥ श्रीएकांबरेश्वराय नमः॥ तेजोबिंदूपनिषत्समाप्ता ॥

43. *Nādabindūpanishad*, p. 503 : वाङ्मनसीति शांतिः ॥ ओं

अकारो दक्षिणः पक्ष उकारस्तूत्तर स्मृतः ।
मकारं पुच्छमित्याहुरर्धमात्रा तु मस्तकं ॥
पादादिकं गुणास्तस्य शरीरं तत्वमुच्यते ।
धर्मो ऽस्य दक्षिणश्चक्षुरधर्मो ऽथोपर स्मृतः ॥ ०

Here again we have (with variations) the 20 *ślokas*, of which the *Nādabindu* consists in the *Ātharvaṇa Upanishads*, pp. 15–17; after which the MS. continues (for some 35 *ślokas* more) as follows :

आत्मानं सततं ज्ञात्वा कालं नय महामते ।
प्रारब्धमखिलं भुंजंनोद्वेगं (!) कर्तुमर्हसि ॥
उत्पन्ने चात्मविज्ञाने प्रारब्धं नैव मुंचति ।
तत्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ॥ ०

It ends : दृष्टि स्थिरा यस्य विना सदृश्यं
वायु स्थिरो यस्य विना प्रयत्नं ।
चित्तस्थिरं यस्य विना विलंबं
स ब्रह्मतारांतरनादरूपः ॥

इत्युपनिषत् ॥ वाङ्मनसीति शांतिः ॥ नादबिंदूपनिषत्समाप्ता ॥

44. *Dhyānabindūpanishad*, p. 509 : सह ० ॥ ओं

यदि शैलसमं पापं विस्तीर्णं बहुयोजनं ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥
बीजाक्षरं परं बिंदु नादं तस्योपरि स्थितं ।
स शब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदं ॥ ०

*Ślokas* 3–10 of the printed text, *Āth. Up.* pp. 26, 27 ; after which the MS. proceeds:

ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वमुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥
अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अंतरिक्षं यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥ ०

some 140 *ślokas* more. It ends :

तत्त्वानि ज्योतिश्च(!) नादं तु बिंदु महेश्वरं पदं ।
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥

इत्युपनिषत् ॥ सह ०१॥ ध्यानबिंदूपनिषत्समाप्ता ॥

45. *Brahmavidyopanishad*, p. 519 : सह० ॥ ओं ब्रह्मविद्योपनिषदुच्यते ।

प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं ब्रह्मविद्यायां ध्रुवाग्निं संप्रचक्षते ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयं तथा ॥ etc.,

to the end of the text in the *Āth. Up.*, p. 202 ; the last *half-śloka* running here,

धियं हि चिंतयते ब्रह्म सो ऽमृतत्वाय कल्पते ॥

These 13 *ślokas*, however, only form the first paragraph ; this being followed by a second section of nearly 100 *ślokas*, beginning :

वायुस्तेजस्तथाकाशस्त्रिविधो जीवसंज्ञितः ।
स जीवः प्राण इत्युक्तो वालाग्रशतकल्पितः ॥
नाभिस्थाने स्थितं विश्वं शुद्धतत्वं सुनिर्मलं ।
आदित्यमिव दीप्यंतं रश्मिभिश्चाखिलं शिवं ॥ ०

Ending :

सर्वग्रासो ऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहं ।
एवं यो वेद तत्वेन स वै पुरुष उच्यते ॥

46. *Yogatattvopanishad*, p. 527 : सह ० ॥ ओं

योगतत्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
तच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णोर्नाम महायोगी महाभूतो महातपाः ।
तत्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः ।
पप्रच्छ योगतत्वं मे ब्रूहि चाष्टांगसंयुतः ॥
तमुवाच हृषीकेशो वक्ष्यामि शृणु तत्वतः ।
सर्वे जीवाः सुखैर्दुःखैर्मायाचारेण वेष्टिताः ॥ ०

सत्यमेव जयते

Some 140 *ślokas*, the last of which is:

निषिद्धैनैवभिर्द्वारैर्निर्जने निरुपद्रवे ।
निष्ठितं तात्मभूतानामनिष्टं (!) योगसेवया ॥

47. *Ātmabodhopanishad*, p. 539: वाङ्मे मनसीति शांतिः ॥ प्रत्यगानंदं ब्रह्मपुरुषं । प्रणवस्वरूपं । अकार उकार मकार इति त्र्यक्षरं प्रणवं तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसारबंधनात् । ओं नमो नारायणाय शंखचक्रगदाधराय ° Prose and verse.

It ends: आनंदत्वान्न मे दुःखमज्ञानाज्ञावसत्यवदिति । आत्मबोधोपनिषदं मुहूर्तमुपासित्वा न च पुनरावर्तते ॥ वाङ्मे ° ॥

48. *Nārada-parivrājakopanishad*, in 9 sections (*upadeśa*), p. 543: ओं भद्रं कर्णेभिरिति शांतिः ॥ ओं अथ कदाचित्परिव्राजकाभरणो नारदः सर्वलोकसंचारं कुर्वन्नपूर्वपुण्यस्थलानितीर्थ (!) कुर्वन्नवलोक्य चित्तशुद्धिं प्राप्य निर्वैरः शांतो दांतः सर्वतो निर्वेदमासाद्य स्वरूपसंधानमनुसंधाय नियमानंदविशेषगण्यं । मुनिजनैरुपसंकीर्णं नैमिशारण्यं पुण्यस्थलमवलोक्य ° Prose and verse.

It ends: यत्र गत्वा न निवर्तन्ते योगिनः सूर्यो न तत्र भाति न शशांको ऽपि न स पुनरावर्तते । न स पुनरावर्तते तत्कैवल्यमित्युपनिषत् ॥ नवमोपदेशः ॥ भद्रं ° ॥ नारदपरिव्राजकोपनिषत्समाप्ता ॥

49. *Triśikhibrāhmaṇopanishad*, p. 579: पूर्णमद इति शांतिः ॥ ओं त्रिशिखिब्राह्मण आदित्यलोकं जगाम तं गत्वोवाच भगवन् किं देवाः किं प्राणाः किं कारणं किमात्मा। तं होवाच सर्वमिदं शिव एव विजानीहि किंतु नित्यशुद्धो निरंजनो विभुरद्वयः शिव एकः स्वेन भासेदं सर्वं दृष्ट्वा तप्ता यः (!) पिंडवदेकं भिन्नवदवभासते ॥ °

It ends: सुषुप्तिवद्यश्चरति स्वभावपरिनिश्चलः । निर्वाणपदमाश्रित्य योगी कैवल्यमित्युपनिषत् ॥ पूर्ण ° ॥

50. *Sītopanishad*, p. 591: ओं भद्रं कर्णेभिरिति शांतिः ॥ ओं देवा ह वै प्रजापतिमब्रुवन् का सीता किं रूपमिति । स होवाच प्रजापतिः । सीता इति मूलप्रकृतिरूपत्वात्सा सीता प्रकृति स्मृता । प्रणवप्रकृतिरूपत्वात्सा सीता प्रकृतिरित्युच्यते ।

सीता इति त्रिवर्णात्मा साक्षान्मायमया भवेत् ।
विष्णुः प्रपंचबीजञ्च माया ईकार उच्यते ॥ °

Mainly prose.

It ends: अलं चकार स्थिरा प्रसन्नलोचनसर्वदेवतैः (!) पूज्यमाना वीरलक्ष्मीति विज्ञायतेत्युपनिषत् ॥ °

51. *Yogacūḍāmaṇi-upanishad*, p. 595: आप्यायंत्विति शांतिः ॥

ओं योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगांगानि भवंति षट् ॥ °

It ends:

यथा त्रितिय्यकाले तु रविः प्रत्याहरेत्प्रभां ।
त्रितिय्यांगस्थितो योगी विकारं मानसं हरेदित्युपनिषत् ॥ °

52. *Nirvāṇopanishad*, p. 607: वाङ्मे मनसीति शांतिः ॥ ओं अथ निर्वाणोपनिषदं व्याख्यास्यामः । परमहंसः सो ऽहं । परिव्राजकाः पश्चिमलिंगाः । मन्मथक्षेत्रपालकाः गगनसिद्धांतं अमृतकल्लोलनदी । अक्षयं निरंजनं । निःसंशयः ऋषिः । निर्वाणो देवता । निष्कशप्रवृत्तिः । निष्केवलज्ञानं । ऊर्ध्वाम्नायः । °

It ends: सन्यासं अंते ब्रह्म खंडाकारं । नित्यं सर्वसंदेहनाशनं । एतं निर्वाणदर्शनं । शिष्यं पुत्रं विना न देयमित्युपनिषत् ॥ °

53. *Maṇḍalabrāhmaṇopanishad*, in 5 sections (*brāhmaṇa*), p. 609: पूर्णमद ° ॥ ओं याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम । तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्वमनुब्रूहीति । स होवाच नारायणः । ज्ञानयुक्तयमाद्यष्टांगयोगमुच्यते । शीतोष्णाहारनिद्राविजयः । सर्वदा शांतिः । निश्चलत्वं । विषयेंद्रियनिग्रहश्चैते यमाः । °

It ends: तन्मातृपितृजयापत्यवर्गं च मुक्तं भवतीत्युपनिषत् ॥ पंचमं ब्राह्मणं ॥ पूर्ण ° ॥

54. *Dakshiṇāmūrtyupanishad*, p. 619: सह ° ॥ ब्रह्मावर्ते महाभांडीरवटमूले महासत्राय समेता महर्षयः शौनकादयस्ते ह समित्पाणयस्तत्वजिज्ञासवो मार्कंडेयं चिरं जीवनमुपनमेत्य (! ? उपसमेत्य) पप्रच्छुः । केन त्वं चिरं जीवसि केन वानंदमनुभवसीति °

It ends: य इमां परमरहस्यं शिवतत्वरहस्यविद्यामधीते स सर्वपापेभ्यो मुक्तो भवति । य एवं वेद स कैवल्यमनुभवति । स कैवल्यमनुभवतीत्युपनिषत् ॥ °

55. *Śarabhopanishad* (= 67. *Paippalādop.*), p. 623: भद्रं° ॥ अथ हैनं पैप्पलादो ब्रह्माणमुवाच । भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा अधिकतरो ध्येय स्यात्तत्वमेव मे ब्रूहीति। तस्मै स होवाच पितामहश्च हे पैप्पलाद शृणु वाक्यमेतत् । बहूनि पुण्यानि कृतानि येन तेनैव लभ्यः। परमेश्वरोऽसौ । यस्यांगजोऽहं ।°

It ends; स सततं शिवप्रियो भवति । स शिवसायुज्यमेति । न स पुनरावर्तते° इत्याह भगवान् ब्रह्मेत्युपनिषत् ॥ भद्रं° ॥

56. *Skandopanishad*, p. 627: सह° ॥ हरिः ओं

अच्युतोऽस्मि महादेव तव कारुण्यलेशतः ।
विज्ञानघनं एवास्मि शिवोऽस्मि किमतः परं ॥
न निजं निजवद्भाति अंतःकरणजृंभणात् ।
अंतःकरणनाशेन संविन्मात्रस्थितो हरिः ॥°

Fifteen *ślokas*.

57. *Mahā-Nārāyaṇopanishad*, in two *kāṇḍas* of 4 adhyāyas each, p. 629: भद्रं° ॥ ओं अथ परमतत्वरहस्यं जिज्ञासुः परमेष्ठिर्देवमानेन सहस्रं संवत्सरं तपश्चचार । सहस्रवर्षेऽतीतेऽत्युग्रतीव्रतपसा प्रसन्नं भगवंतं महाविष्णुं ब्रह्मा परिपृच्छति । भगवन्परमतत्वरहस्यं मे ब्रूहीति । परमतत्वरहस्यवक्ता त्वमेव नान्यः कश्चिदस्ति तत्कथमिति । तदेवोच्यते त्वमेव सर्वज्ञः । त्वमेव सर्वशक्तिः । त्वमेव सर्वाधाराः ।°

The 2nd *kāṇḍa* (5th adhyāya) begins p. 642: अथ शिष्यो वदति । गुरुं भगवंतं नमस्कृत्य । भगवत्सर्वात्मना । नष्टाया अविद्यायाः पुनरुदयः कथं सर्वमेवेति गुरुरिति होवाच ।°

It ends: ततो महाविष्णुस्तिरोदधे । ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ॥ उत्तरकांडः समाप्तः ॥ इत्यथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपणनिरूपणं नामाष्टमोऽध्यायः ॥ भद्रं°

[58–69, written (very incorrectly) in Devanāgarī characters, '*Upanishads* received from the Rajah of Tanjore, 1856.']

58. *Rahasyopanishad*, p. 676:

परमाद्वैतसत्यात्मा प्रज्ञा साद्वैतचिद्ध्रुवं ।
आश्रये दक्षिणामूर्तिमवाङ्मनसं गोचरं ॥

अथातो रहस्योपनिषदं व्याख्यास्यामः ॥ देवऋषयो ब्रह्मणे संपूज्य प्रणिपत्य प्रभुः । भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति सोऽब्रवीत् ।

पुरा व्यासो महातेजा सर्वदेवो तपोनिधिः ।°

59. *Jābālopanishad*, p. 681: अथैनं ब्रह्मचारिण ऊचुः । किं जप्येनामृतं ब्रूहि स होवाच याज्ञवल्क्यः । शतरुद्रीयेणेत्येतानि ह वामृतस्य नामान्येतैर्ह वा अमृतो भवतीति शातातपः ।°

60. *Cityupanishad* (= *Taitt. Ār.* III), p. 682.

61. *Śārīropanishad*, p. 693; अथातः पृथिव्यादिमहाभूतानां समवायं शरिरं यत्कठिनं सा पृथिवी यद्द्रवं तदापः । यदुष्णं तत्तेजः । यः संचरति स वायुः । यः सुषिरं तदाकाशं । श्रोत्रादीनि ज्ञानेंद्रियाणि श्रोत्रमाकाशे । वायौ त्वक् । अग्नौ चक्षुः । अप्सु जिह्वा । पृथिव्यां घ्राणमिति° See further on, No. 79.

62. *Amṛitabindūpanishad*, p. 694: मनो हि द्विविधं°

63. *Brahmopanishad*, p. 696: भद्रं कर्णेभिः° ॥ अथास्य पुरुषस्य°

64. *Garbhopanishad*, p. 698: सह° ॥ पंचात्मकं°

65. *Sarvasāropanishad*, p. 701: कथं बद्धः कथं मोक्षः कावीद्या (!) का च विद्यते। जाग्रत्स्वप्नसुषुप्तितुर्यं च कथं ।° Wants more than a fourth part of the tract at the end.

66. *Kaushītaki-brāhmaṇopanishad*, the 3rd and 4th adhyāyas, p. 703: कौषतकीब्राह्मणोपनिषत् । प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगाम । युद्धेन च पौरुषेण च ।°

This MS. follows the recension represented by Cowell's MSS. F. G.; the passages marked with * in the edition, pp. 105, 108 being omitted.

67. [*Bṛihajjābāle*] *Paippalādopanishad* (corresponding to *Śarabhopanishad* 55, above), p. 711: अथ पैप्पलादो ब्रह्माणमुवाच भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा अधिकतरो ध्येयः ।°

It ends: न च पुनरावर्तते इत्याह भगवान् ब्रह्मा इति बृहज्जाबाले पैप्पलादोपनिषत् ॥ सकृज्जप्त्वा शिवसायुज्यमाप्नोति ॥ इति पैप्पलादं समाप्तं ॥

68. [*Bṛihajjābāle*] *Pañcabrahmavidyopanishad*, p. 714: भो भो भगवन्नादौ किं जातमिति । सद्योजातमिति किमाह भगव इति । अघोर इति किं वा भगव इति । वामदेव इति पुनरिति भगव इति तत्पुरुष इति । पुनरिति होवाच सर्वेषां (!) विद्यानां विप्रदाता ईशान इति । °

It ends: कृपां चकारतरते स्वांतधीम अगम स्वयं इति शाकलीय ॥ बृहज्जाबाले पंचब्रह्मविद्या उपनिषत् समाप्ता ॥

69. *Itihāsopanishad*, p. 716: वृषादर्विकुलं(!) ह वै शिविकुलं बभूव तस्यायमितिहासः । कुलं विद्याभूव (!) । तद्यो ह स्म मे मदिते स ह स्मै राजा भवति । न किंचिन्योंव्यांतर्हितः । सो ब्रवित् यो मामितिहासं ग्राहयेत् । परमे स्मै दधामिति ततो ब्राह्मणः । संयोग" संयुयजे । समादित्यात्पुरुषो भास्करवर्ति निष्क्रम्य । स एनं ग्राहयां चकार । तमपृछ कोसिति वा वृषादर्विरिती तस्माद्यमितिहासमधीते (!) । °

b. Volume II.

70. *Advaitārkopanishad*, p. 679: पूर्णमद इति शांतिः ॥ ओं अथात अद्वयतार्कोपनिषदं (!) व्याख्यास्यामो यतये जितेंद्रियाय शमादिषड्गुणपूर्णाय चित्स्वरूपोऽहमिति सदा भावयं सम्यग्निमीलिताक्षो किंचिदुन्मीलिताक्षो वांतर्दृष्ट्या । भूदहरामपरिसच्चिदानंदतेजः । कूटरूपं परं ब्रह्मावलोकयन् तद्रूपो भवति । गर्भजन्मजरामरणसंसारमहद्भयात्संतारयति । °

It ends:

गुरुरेव परा काष्ठा गुरुरेव परं धनं ।
यस्मात्तदुपदेष्टासौ तस्माद्गुरुतरो गुरुरिति ॥

यस्य कृदुच्चारयति तस्य संसारमोचनं भवति । सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति सर्वान्कामानवाप्नोति सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥ पूर्ण° ॥ अद्वैतार्कोपनिषत्समाप्ता ॥

71. *Rāmarahasyopanishad*, in five adhyāyas, p. 683: भद्रं ० ॥ ओं

सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनूमंतमथाब्रवीत् (!) ॥
वायुपुत्र महाबाहो किं तत्वं ब्रह्मवादिनां ।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिके ऽपि च ।
सर्वेषु विद्यादानेषु विघ्नसूर्येशशक्तिषु ॥
एतेषु मध्यं किं तत्वं कथय त्वं महाबल ।
हनुमान्होवाच । भो योगींद्राश्च ऋषयो विष्णुभक्तास्तथैव च ॥ °

This is the *Hanumad-ukta Rāmopanishad* of the *Ātharvaṇa Upanishad*, p. 385 *seq.;* and above p. 115*a*.

72. *Rāmapūrvatāpanīyopanishad*, p. 699: ओं भद्रं ° ॥ ओं चिन्मये ऽस्मिन्महाविष्णौ °

73. *Rāmottaratāpanīyopanishad*, p. 707: ओं भद्रं° ॥ ओं बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं °

74. *Vāsudevopanishad*, p. 715: आप्यायंत्विति शांतिः ॥ ओं नमस्कृत्य भगवान्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ अधीहि भगवन् ऊर्ध्वपुंड्रविधिं द्रव्यमंत्रस्थानादिविधिं मे ब्रूहीति । तं होवाच भगवान्वासुदेवः । वैकुंठस्थानादुत्पन्नं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं । विष्णुचंदनं ममांगे प्रतिदिनमालिप्तं गोपीभिः । प्रक्षालनाद्गोपीचंदनमाख्यातं मदंगे लेपनं । पुण्यं चक्रतीर्थांतस्थितं चक्रसमायुक्तं । पीतवर्णं मुक्तिसाधनं भवति । अथ °

75. *Mudgalopanishad*, p. 719; वाङ्मे ° ॥ ओं पुरुषसूक्तार्थनिर्णयं व्याख्यास्यामः । पुरुषसंहितायां पुरुषसूक्तार्थः संग्रहेण प्रोच्यते । सहस्रशीर्षेत्यत्र स शब्दो ऽनंतवाचकः ।

अनंतयोजनं प्राह दशांगुलवचस्तथा ।
तस्य प्रथमया विष्णोर्देशतो व्याप्तिरीरिता ॥
द्वितीयया चास्य विष्णोः कालतो व्याप्तिरुच्यते ।
विष्णोर्मोक्षप्रदत्वं च कथितं तु तृतीयया ॥ °

Four sections.

It ends: असकृत्कर्णमुपदिशेत्कुर्वाणो ऽध्येताध्यापकश्च इहजन्मनि पुरुषो भवतीत्युपनिषत् ॥ वाङ्मे ° ॥

76. *Śāṇḍilyopanishad*, in three adhyāyas (of 15 sections), p. 723: भद्रं ° ॥ ओं शांडिल्यो ह वा अथर्वाणं पप्रच्छात्मलाभोपायभूतमष्टांगयोगमनुब्रूहीति । स होवाचाथर्वा । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो ऽष्टांगानि । तत्र दश यमाः । °

It ends: एवं यः सततं ध्यायेद्देवदेवं सनातनं ।
स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥

77. *Paiṅgalopanishad*, p. 743: ओं अथ हैनं पैंगलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषापूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ। स होवाच याज्ञवल्क्यः। सदेव सोम्येदमग्र आसीत्। तन्नित्यमुक्तमविक्रियं सत्यज्ञानानंदं परिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म। अस्मिन्मरुशुक्तिकास्थाणुस्फटिकादौ जलकाप्यपुरुषरेखादिवत्। लोहितशुक्लकृष्णागुणमया गुणसामान्यानिर्वाच्या मूलप्रकृतिरासीत्।°

It ends with *Rigv.* I. 22, 20–21: तद्विष्णोः परमं पदं ° विष्णोर्यत्परमं पदं॥ ओं सत्यमित्युपनिषत्॥ पूर्णमद ° ॥

78. *Bhikshukopanishad*, p. 753: पूर्ण ° ॥ ओं अथ भिक्षूणां मोक्षार्थिनां कुटीचकबहूदकहंसपरमहंसाश्चेति चत्वारः। कुटीचको नाम गौतमभरद्वाजयाज्ञवल्क्यवसिष्ठप्रभृतयो ऽष्टाग्रासं चरंतो योगमार्गे मोक्षमेव प्रार्थयंते। अथ बहूदको नाम त्रिदंडं कमंडलुं शिखां यज्ञोपवीतं काषायवस्त्रधारिणो ब्रह्मर्षिगृहे मधु मांसं वर्जयित्वा अष्टग्रासान्भैक्षाचरणं कृत्वा योगमार्गे मोक्षमेव प्रार्थयंते। अथ हंसा नाम ग्रामैकरात्रं (!) नगरे पंचरात्रं क्षेत्रे सप्तरात्रं तदुपरि न वसेत्। गोमूत्रगोमयाहारिणो नित्यं चांद्रायणपारायणयोगमार्गे मोक्षमेव प्रार्थयंते। अथ परमहंसा नाम संवर्तकारुणिश्वेतकेतुजडभरतदत्तात्रेयशुकवामदेवहरितकप्रभृतयो ऽष्टाग्रासं चरंतो योगमार्गे मोक्षमेव प्रार्थयंते।° About as much more.

79. *Mahopanishad*, in six adhyāyas, p. 755: आप्यायंत्विति शांतिः॥ ओं अथातो महोपनिषदं व्याख्यास्यामः। तदाहुरेको ह वै नारायण आसीन्न ब्रह्म नेशानो नापो ऽग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चंद्रमाः स एकाकी नरमेत तस्य ध्यानांतस्थस्य यज्ञस्तोममुच्यते।° The first adhyāya corresponds on the whole to the *Mahopanishad* of the former collections.

Adhy. II. begins: ओं शुको नाम महातेजाः स्वरूपानंदतत्परः ° It ends: इत्याह भगवान् हिरण्यगर्भः जाप्येनामृतत्वं च गच्छतीत्युपनिषत्॥ षष्ठोध्यायः॥ आप्यायंत्विति ° महोपनिषत्समाप्ता॥

80. *Śārīrakopanishad*, p. 799: सह ° ॥ ओं अथातः पृथिव्यादिमहाभूतानां समवायत् शरीरं यत्कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजो यत्संचरति स वायुर्यत्सुषिरं तदाकाशं ° See above, *Up.* 61.

81. *Yogaśikhopanishad*, in six adhys., p. 801: सह ° ॥ ओं

सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः।
तेषां मुक्तिः कथं देव कृपया वद शंकर॥
सर्वसिद्धिकरं मार्गं मायाजालनिकृंतनं।
जन्ममृत्युजराव्याधिनाशनं सुखदं वद॥

इति हिरण्यगर्भः पप्रच्छ। स होवाच महेश्वरः।

नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदं।
सिद्धिमार्गेण लभते नान्यथा पद्मसंभव॥
पतिता शास्त्रजालेषु प्रज्ञा या तेन मोहिता।
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते॥°

It ends:

कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद् दृढं।
अभ्यासवासनाशक्त्या (!) तरंति भवसागरमित्युपनिषत्॥

षष्ठो ऽध्यायः॥ सह ° ॥ योगशिखोपनिषत्समाप्ता॥

82. *Turīyātītāvadhūtopanishad*, p. 827: पूर्णमद इति शांतिः॥ ओं अथ तुरीयातीतावधूतानां को ऽयं मार्गस्तेषां का स्थितिरिति पितामहो भगवंतं पितरमादिनारायणं परिसमेत्योवाच। तमाह भगवां नारायणो यो ऽयमवधूतमार्गस्थो लोके दुर्लभतरो न तु बाहुल्यो यद्येको भवति स एव नित्यपूः स एव वैराग्यमूर्तिः स एव ज्ञानाकारः स एव वेदपुरुष इति ज्ञानिनो मन्यंते। महापुरुषो यस्तच्चित्तं मय्येवावतिष्ठते °

It ends: प्रणवात्मकत्वेन देहत्यागं करोति यः सो ऽवधूतः स कृतकृत्यो भवतीत्युपनिषत्॥°

See *Paramahaṃsopanishad*, in *Āth. Up.*, p. 417 *seq.*

83. *Sannyāsopanishad*, p. 829: आप्यायंत्विति शांतिः॥ ओं अथातः सन्यासोपनिषदं व्याख्यास्यामो यो ऽनुक्रमेण संन्यस्यति स संन्यस्थो (!) भवति को ऽयं स उच्यते कथं संन्यस्थो भवति य आत्मानं क्रियाभिर्गुप्तं करोति मातरं पितरं भार्यां पुत्रान्बंधूननुमोदयित्वा ये चास्यर्त्विजस्तान्सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरेष्टिं निर्वपेत्सर्वस्वं दद्यात्°

It ends:

यस्तु द्वादशसाहस्रं प्रणवं जपते ऽन्वहं।
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशत इत्युपनिषत्॥

आप्यायंत्विति शांतिः॥

84. *Paramahaṃsa-parivrājakopanishad*, p. 843: भद्रं ° ॥ ओं अथ पितामहः स्वपितरमादिनारायणमुपसमेत्य प्रणम्य पप्रच्छ। भगवं त्वन्मुखाद्वर्णाश्रमधर्मक्रमं सर्वं

श्रुतं विदितमवगतमिदानीं परमहंसपरिव्राजकलक्षणं वेदितुमिच्छामि। कः परिव्रजनाधिकारि कीदृशं परिव्राजकलक्षणं। कः परमहंसः। परिव्राजकत्वं कथं तत्सर्वं मे ब्रूहीति। स होवाच भगवानादिनारायणः। सद्गुरुसमीपे सकलविद्यापरिश्रमज्ञो°

It ends: प्रणवानुसंधानेन यः कृतकृत्यो भवति स परमहंसपरिव्राडित्युपनिषत्॥ भद्रं°॥

85. *Akshamālikopanishad*, p. 849: वाङ्मे°॥ ओं अथ प्रजापतिर्गुहं पप्रच्छ। भो ब्रह्मन्नक्षमालभेदविधिं ब्रूहीति। सा किंलक्षणा कति भेदा अस्याः कानि सूत्राणि कथं घटनाप्रकारः का प्रतिष्ठा कैषाधिदेवता किं फलं चेति। तं गुहः प्रत्युवाच°

It ends: य एवमक्षमालिकया जप्तो मंत्रः सद्यः सिद्धिकरो भवतीत्याह भगवान्गुहः प्रजापतिमित्युपनिषत्॥ वाङ्मे°॥

86. *Avyaktopanishad*, p. 855: आप्यायंत्विति°॥ ओं पुरा किलेदं न किंचनासीन्न द्यौर्नांतरिक्षं न पृथिवी। केवलं ज्योतिरूपमनाद्यनंतमनण्वस्थूलरूपमरूपं रूपवदविज्ञेयं ज्ञानरूपमानंदमयमासीत्। तदनन्यत्तद्द्वेदाभूत् (!)। हरितमेकं रक्तमपरं तत्र यद्रक्तं तत्पुंसो रूपमभूत्। यद्धरितं तन्मायायाः। तौ समागच्छतः। तयोर्वीर्यमेव नंदत्तदवर्धत तदंडमभूद्धैमं तत्परिणममानमभूत्। ततः परमेष्ठी व्यजायत सो ऽभिजज्ञासत्। किं मे कुलं किं मे कृत्यमिति तं ह वागदृश्यमानाभ्युवाच। भो भो प्रजापते। त्वमव्यक्तादुत्पन्नो ऽसि व्यक्तं ते कृत्यमिति। किमव्यक्तं यस्मादहमाशिषं किं तद्व्यक्तं यन्मे कृत्यमिति सो ऽब्रवीत्। अविज्ञेयं हि तत्। सोम्यतेजो यदविज्ञेयं तदव्यक्तः। तच्चेज्जिज्ञास्यसि मावगच्छेति। स होवाच कैषा त्वं ब्रह्मवाग् वदसि शंसात्मानमिति। सा त्वब्रवीत् तपसा मां जिज्ञासस्वेति। सहस्रं समा ब्रह्मचर्यमध्युवासाध्युवास॥१॥ Seven sections.

87. *Ekāksharopanishad*, p. 861: सह°॥ ओं

एकाक्षरं त्वक्षरतो ऽसि सोमे सुषुम्नया चेह दृढी
न एकः (!)।
त्वं विश्वभूर्भूतपतिः पुराणः पर्जन्य एको भुवनस्य
गोप्ता॥
विश्वे निमग्नः पदवी कवीनां त्वं जातवेदो
भुवनस्य नाथः।
अजं तमग्रे स हिरण्यरेता यज्ञस्त्वमेवैकविभुः पुराणः॥
प्राणः प्रसूतिर्भुवनस्य योनिर्व्याप्तं त्वय एकपदेन विश्वं।
त्वं विश्वभूर्योनिपारं (!) सुगर्भे कुमार एको विशिखे
सुधन्वा॥
वितत्य बाणं तरुणार्कवीर्णं योमांतरे(व्यो° ?) भासि
हिरण्यगर्भः।
भासा त्वया व्योम्नि कृतं सुतार्क्ष्यस्त्वं वै कुमारस्त्वमरिष्टनेमिः॥
त्वं वज्रभृद्भूतपतिस्त्वमेव कामः प्रजानां निहितोसि सोमे।
स्वाहास्वधा यश्च वषट्करोति रुद्रः पशूनां गुहया निरुग्नः॥
धाता विधाता पवनः सुपर्णो विष्णुर्वराहे रजनीरहश्च।
भूतं भविष्यत्प्रभवः क्रियाश्च कालः क्रमस्त्वं परमाक्षरं च॥
ऋचो यजूंषि प्रसवंते वक्त्रा समासीसम्राड्सुरंतरिक्षम्।
त्वं यज्ञनेता हुतभुग्विभुश्च रुद्रास्तदा दैत्यगणा वसुश्च॥
स एष देवो ऽम्बरयानचक्रे अन्ये ऽभ्यतिष्ठत तमो-
निरुद्धः (!)।
हिरण्मयं यस्य विभाति सर्वं व्योमांतरे रश्मिमिवं
सुनाभिः॥°

Five more couplets.

88. *Annapūrṇopanishad*, in four adhyāyas, p. 863: भद्रं°॥

ओं निदाघो नाम योगींद्र ऋभुं ब्रह्मविदां वरं।
प्रणम्य दंडवद्भूमावुत्थाय स पुनर्मुनिः॥
आत्मतत्वमनुब्रूहीत्येतं पप्रच्छ सादरं।
कयोपासनया ब्रह्मन्नीदृशं प्राप्तवानसि॥
तां मे ब्रूहि महाविद्यां मोक्षसाम्राज्यदायिनीं।
निदाघ त्वं कृतार्थो ऽसि शृणु विद्यां सनातनां॥
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि।
मूलशृंगाटमध्यस्था बिंदुनादकलाश्रया॥
नित्यानंदा निराधारा विख्याता विलसत्कचा।
विश्वेशी महालक्ष्मीः कामस्तारो नतिस्तथा॥°

It ends: अन्नपूर्णोपनिषदं यो ऽधीते गुर्वनुग्रहात्।
स जीवन्मुक्ततां प्राप्य ब्रह्मैव भवति स्वयमित्युपनिषत्॥°

89. *Sūryopanishad*, p. 887: ओं भद्रं°॥ ओं अथ सूर्याथर्वांगीरसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्री छंदः। आदित्यो देवता। हंसः सो ऽहमग्निनारायणयुक्तं बीजं हृल्लेखा शक्तिः। वियदादि सर्गसंयुक्तं कीलकं चतुर्विधपुरुषार्थसिध्यर्थे विनियोगः। षट् स्वरारूढेन बीजेन षडंगं। रक्तांबुजसंस्थितं।°

90. *Akshyupanishad*, p. 891: सह॰॥ ओं अथ ह सांकृतिर्भगवानादित्यलोकं जगाम। तत्रादित्यं नत्वा चाक्षुष्मतिविद्यया (!) तमस्तुवत्। ओं नमो भगवते श्रीसूर्यायाक्षितेजसे नमः। ओं खेचराय नमः ओं महासेनाय नमः। ओं तमसे नमः। ओं तेजसे नमः। ओं सत्याय नमः। असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय। उष्णो भगवं भूचीरूपः (!)। हंसो भगवां भुचीरूपः (!)। प्रतिरूपः। एवं चाक्षुष्मतिविद्यया स्तुतः सूर्यनारायण. सुप्रीतो ऽब्रवीत्। विश्वरूपं घृणिसंजातवेदनं। हिरण्मयं ज्योतिरूपं तपंतं। सहस्ररश्मिः शतधा वर्तमानः पुरुषः। प्रजानामुदयत्येष सूर्यः। ओं नमो भगतते श्रीसूर्यायादित्यायाक्षितेजसे मे वाहिनी वाहिनी।॰

It ends: आनुदममलं (!) शुद्धं। मनो वाचामगोचरं प्रज्ञानघनमानंदं। ब्रह्मास्मीति विभावयेदित्युपनिषत्॥ सह॰॥ अक्ष्यूपनिषत् (! thus also at the beginning) समाप्ता॥

91. *Adhyātmopanishad*, p. 895: पूर्णमद॰। ओं अंतःशरीरे निहितो गुहायामज एको नित्यमस्य पृथिवीशरीरं। यः पृथिवीमंतरे संचरन्यं पृथिवी न वेद। यस्यापः शरीरं यो ऽपो ऽंतरे संचरन्यमापो न विदुः। यस्य तेजः शरीरं यस्तेजो ऽंतरे संचरन्यं तेजो न वेद। यस्य वायुः॰। यस्याकाशः॰। यस्य मनः॰। यस्य बुद्धिः॰। यस्याहंकारः॰। यस्य चित्तं॰। यस्याव्यक्तं॰। यस्याक्षरं॰। यस्य मृत्युः॰ वेद। स एष सर्वभूतांतरात्मापहतपाप्मा दिव्यो देव एको नारायणः।॰

92. *Kuṇḍinakopanishad*, p. 901: ओं आप्यायंत्विति शांतिः॥

ओं ब्रह्मचर्याश्रमे क्षीणे गुरुशुश्रूषणे रतः।
वेदानधीत्यनुज्ञात उच्यते गुरुणाश्रमी॥
दारामाहृत्य सदृशमग्निमाधाय शक्तितः।
ब्राह्मीमिष्टिं यजेत्तासामहोरात्रेण निर्वपेत्॥
संविभज्य सुतानर्थैं ग्राम्यकामान्विसृज्य च।
संचरन्वनमार्गेण शुचौ देशे परिभ्रमन्॥
वायुभक्षो ऽंबुभक्षो वा विहितैः कंदमूलकैः।
स्वशरीरे समाप्याय पृथिव्यां नाशु पातयेत्॥
सह तेनैव पुरुषः कथं संन्यस्त उच्यते।
स नामदेयो यस्मिंस्तु कथं संन्यस्त उच्यते॥॰

93. *Sāvitryupanishad*, p. 905: आप्या॰॥ ओं कः सविता का सावित्री। अग्निरेव सविता। पृथिवी सावित्री। सावित्री यत्राग्निस्तत्पृथिवी ते द्वे योनिस्तदेकं मिथुनं। कः सविता का सावित्री। वरुण एव सविता(पः) सावित्री। स यत्र वरुणस्तदापो। यत्र वा। आपस्तद्वरुणस्ते द्वे॰। वायुरेव सविता आकाशः सावित्री॰। यज्ञ एव सविता छंदांसि सावित्री॰। स्तनयित्नुरेव सविता विद्युत्सावित्री॰। आदित्य एव सविता द्यौः सावित्री॰। चंद्र एव सविता नक्षत्राणि सावित्री॰। मनः सवितत्र वाक् सावित्री॰। पुरुष एव सविता स्त्री सावित्री॰ तदेकं मिथुनं। तस्या एव प्रथमः पादो भूस्तत्सवितुर्वरेण्यमित्यग्निर्वै वरेण्यमापो वरेण्यं॰

94. *Ātmavidyopanishad*, p. 907: भद्रं॰॥ ओं अथांगिरास्त्रिविधः पुरुषो जायत आत्मांतरात्मा परमात्मा चेति। त्वक्चर्ममांसरोमांगुष्ठांगुल्यपृष्ठवंशनख॰ See *Ātmopanishad*, *Āth. Up.*, p. 299 *seq.*; and MS. 1726, *Up.* 9 (p. 109), with which it coincides pretty closely, as far as that text goes, except the end, where this MS. reads: संस्कारो नास्ति। आत्मसंज्ञः शिवः शुद्ध एक एवाद्वयः सदा ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते। जाग्रद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते। विद्याविद्यादिभेदेन। भावाभावादिभेदतः। गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते। etc., for more than double the extent of the printed text (and MS. 1726).

95. *Pāśupatabrāhmopanishad*, p. 911: भद्रं॰॥ ओं अथ ह वै स्वयंभुर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते। कामेश्वरो वैश्रवणः। वैश्रवणो ब्रह्मपुत्रो वालकिल्य (!) स्वयंभुं परिपृच्छति। जगतां का विद्या का देवता। जाग्रत्तुरीययोन्यको देवः। यानि कस्य वशानि। कालाः कियत्प्रमाणाः।॰

It ends:

ब्रह्मा विज्ञानसंपन्नः प्रतीतमखिलं जगत्।
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथगित्युपनिषत्॥॰

96. *Parabrahmopanishad*, p. 919: भद्रं॰॥ ओं अथ हैनं महाशालः शौनको ऽंगीरस (!) भगवंतं पिप्पलादं विधिवदुपसन्नः पप्रच्छ। दिव्ये ब्रह्मपुरे संप्रतिष्ठिता भवंति कथं सृजन्नित्यात्म स एष महिमा विभज्य एष

महिमा हि विभुः। क एष तस्मै स होवाच एतत्सत्यं यत्प्रब्रवीमि ब्रह्मविद्यां वरिष्ठां देवेभ्यः प्राणेभ्यः परब्रह्मपुरे विरजो निष्कलं शुभ्रमक्षरं विरजं विभाति। स नियच्छति मधुकरराश्यानिमेकः (!)। अकर्मः स पुरस्थितः। °

It ends : बहिःप्रपंचशिखोपवीतित्वमनादृत्य प्रणवहंसशिखोपवीतत्वमवलंब्य मोक्षसाधनं कुर्यादित्याह भगवान् शौनक इत्युपनिषत् ° ॥

97. *Avadhūtopanishad*, p. 923 : ओं सह° ॥ ओं अथ सांकृतिर्भगवंतमवधूतं दत्तात्रेयं परिसमेत्य पप्रच्छ। भगवन् को ऽवधूतः। तस्य का स्थितिः। किं कर्म। किं संसरणमिति। तं होवाच भगवान्दत्तात्रेयः परमकारुणिकः।

अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबंधनात्।
तत्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते ॥
यो विलंघ्याश्रमान्वर्णां नात्मन्येव स्थितः सदा।
अतिवर्णाश्रमी योगी अवधूतः स कथ्यते ॥ °

It ends : एवं विदित्वा स्वेच्छाचारपरो भूयादों सत्यमित्युपनिषत् ॥ °

98. *Tripurātapanopanishad*, p. 927 : भद्रं° ॥ ओं अथैतस्मिन्नंतरे भगवान्प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवतीत्येवमादिशक्त्या भूर्भुवः सुवस्त्रीणि स्वर्गभूपाताळानि त्रिपुराणि हरमायात्मकेन ह्रींकारेण हृल्लेखाख्या भगवती त्रिकूटावसाने निलये विलये धाम्नि महसा घोरेण व्याप्नोति नैवेयं भगवती त्रिपुरेति व्यापद्यते। तत्सवितुर्वरेण्यं भर्गो °

It ends : तस्मादेतां तुर्यां श्रीकामराजिज्ञामेकदशधा भिन्नमेकाक्षरं ब्रह्मेति यो जानीते स तुरीयपदं प्राप्नोति य एवं वेदेति महोपनिषत् ॥ पंचमोपनिषत् ॥ भद्रं° ॥ त्रिपुरातपनोपनिषत्समाप्ता ॥

99. *Devyupanishad*, p. 947 : भद्रं° ॥ ओं सर्वे वै देवा देवीमुपतस्थुः। कासि त्वं महादेवि। साब्रवीद् अहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यं चाशून्यं च। अहमानंदानानंदो ऽहं विज्ञानाविज्ञानो हं (!) ब्रह्माब्रह्मणी वेदितव्ये इत्याहाथर्वणी श्रुतिः। अहं पंच भूतान्यहं पंच भूतानि। अहमखिलं जगत्। वेदो ऽहमवेदो ऽहं विद्याहमविद्याहं। अजाहमनजाहमधश्चोर्ध्वं च तिर्यक् चाहं। °

It ends : भौमाश्विन्यां महादेवीसंनिधौ जप्त्वा महामृत्युं तरति। य एवं वेदेत्युपनिषत् ॥ °

100. *Tripuropanishad*, p. 951 : वाङ्मे ° ॥

ओं तिस्रः पुरस्त्रिपथो विश्वचर्षणी अत्रा कथा
अक्षरा सन्निविष्टाः।
अधिष्ठायैना अजरा पुराणी महत्तरा महिमा देवतानां ॥
नव योनिं नव चक्राणि दीधिरे नवैव योगा नव
योगिन्यश्च।
नवानां चक्रा अधिनाथास्योनां नव भद्रा नव मुद्रा
महीनां ॥ °

It ends :

परिसृता हविता भावितेन प्रसंकोचे गळिते वैमनस्कः।
शर्वः सर्वस्य जगतो विधाता धर्ता हर्ता विश्वरूपत्वमेति ॥

इयं महोपनिषत् त्रिपुर्यायामक्षयं परमार्गीर्भिरिके (!) एष ऋग्यजुः परमेतच्च सामायमथर्वेयमन्या च विद्या ॥ ओं ओं ह्रीमित्युपनिषत् ॥ वाङ्मे ° ॥ त्रिपुरोपनिषत्समाप्ता ॥

101. *Kaṭhopanishad* (!), p. 953 : सह ° ॥ ओं ॥ देवा ह वै भगवंतमब्रुवन्नधीहि भगवन् ब्रह्मविद्यां। स प्रजापतिरब्रवीत् सशिखान्केशान्निष्कृष्य विसृज्य। यज्ञोपवीतं निष्कृष्य पुत्रं दृष्ट्वा त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारः। त्वमोंकारस्त्वं स्वाहा त्वं स्वधा त्वं धाता (त्वं) विधाता। अथ पुत्रो वदत्यहं ब्रह्माहं यज्ञो ऽहं वषट्कारो ऽहमोंकारो ऽहं स्वाहाहं स्वधाहं धाताहं विधाताहं त्वष्टाहं प्रतिष्ठास्मीति तान्येतान्यनुव्रजन्नाश्रु पातयेद् यदश्रु पातयेत्प्रजां विच्छिंद्यात् प्रदक्षिणमावृत्यैतच्चैतच्चानवेक्षमाणः (!) प्रत्यायाति स स्वर्ग्यो भवति। ब्रह्मचारी वेदमधीत्य वेदोक्ताचरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्यताननुरूपादिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैस्तस्य सन्यासो गुरुभिरनुज्ञातस्य बांधवैश्च सो ऽरण्यं परेत्य द्वादशरात्रं पयसाग्निहोत्रं जुहुयाद् द्वादशरात्रं पयोभक्षः स्याद् द्वादशरात्रस्यांते अग्नये वैश्वानराय प्रजापतये च प्राजापत्यं चरुं वैष्णवं त्रिकपालमग्निं संस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयान्मृण्मयान्यप्सु जुहुयात् तैजसानि गुरवे दद्यात् मा त्वं मामवहाय परागा नाहं त्वामवहाय परागामिति। गार्हपत्यदक्षिणाग्न्याहवनीयेष्वरणिदेशाद्भस्ममुष्टिं पिबेदित्येके। सशिखान्केशान्निष्कृष्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयादत ऊर्ध्वमनशनमपां प्रवेशमग्निप्रवेशं वीराध्वानं महाप्रस्थानं वृद्धाश्रमं वा गच्छेत्। पयसा यत्प्राश्नीयात्सो ऽस्य (?) सायंहोमो यत्प्रातः सो

ऽयं प्रातर्यद्दर्शे । यत्पौर्णमास्ये तत्पौर्णमास्यं यद्वसंते केशश्मश्रुलोमनखानि वापयेत्सो ऽस्याग्निष्टोमः संन्यस्याग्निं न पुरावर्तयेद्यन्मृत्युर्जायिमावहम् (! see *Ath. V.*, xi. 8, 1) इत्यध्यात्ममंत्रान्पठेत् स्वस्ति सर्वजीवेभ्य इत्युक्त्वात्मानमनन्यं ध्यायं (!) तदूर्ध्वबाहुर्विमुक्तमार्गो भवेदनिकेतश्चरेदभिक्षायी यत्किं चन दद्यात्सवैकं (!) न धावयेज्जंतुसंरक्षणार्थं वर्षवर्जमिति ॥ तदपि श्लोका भवंति ।

कुंडिकां चमसं शिक्यं त्रिविष्टपमुपानहौ ।
शीतोपघातिनीं कंदां (? कंदुं) कौपीनाछादनं तथा ॥
पवित्रं स्नानशाटी च उत्तरासंगमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः ॥
स्नानं पानं तथा शौचमद्भिः पूताभिराचरेत् ।
नदीप्रलीनशाया स्याद् देवागारेषु वा स्वपेत् ॥
नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत् ।
स्तूयमानो न तुष्येत निंदितो न शपेत्परान् ॥
ब्रह्मचर्येण संतिष्ठेदप्रमादेन मस्करी ।
दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणं ॥
संकल्पो ऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ °

36 more *ślokas*, the last of which is:

सर्ववेदांतसिद्धांतसारं वच्मि यथार्थतः ।
स्वयं मृत्या (? मृत्वा) स्वयं भूत्वा स्वयमेवावशिष्यत
इत्युपनिषत् ॥

सह ° ॥ कठोपनिषत्समाप्ता ॥

102. *Bhāvanopanishad*, p. 959: भद्रं ° ॥ ओं । श्रीगुरुपरमकारणभूता शक्तिः । ते नवरंध्ररूपा देहाः । नवशक्तिमयं श्रीचक्रं वाराहि पितृरूपा कुरुकुल्ला (sic) वह्निदेवता । माता पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवकमुद्रा शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्तैः संकल्पाः कल्पतरवः तेजः कल्पको ध्यानं । °

It ends: तस्य देवतात्म्यैकसिद्धिः चिंतितकार्याण्ययत्नेन सिध्यंते स एव शिवयोगीति कथ्यते । इत्युपनिषत् ॥ °

103. *Śrī-Rudrahṛidayopanishad*, p. 963: सह° ॥

ओं हृदयं कुंडली भस्म रुद्राक्षगणदर्शनं ।
तारसारमहावाक्यपंचब्रह्माग्निहोत्रकं ॥
ओं प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मिन्देवाश्च सर्वशः ॥
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवंतु मे ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकं ॥
श्रीवेदव्यास उवाच । सर्वदेवात्मको रुद्रः
सर्वे देवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयो ऽग्नयः ॥ °

It ends:

स यो ह वैतत्परमं ब्रह्म यो वेद वै मुनिः ।
ब्रह्मैव भवति स्वस्थः सच्चिदानंदमात्रक इत्युपनिषत् ॥ °

104. *Yogakuṇḍalyupanishad*, p. 967: सह° ॥

ओं हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिंस्तद्द्वावपि विनश्यतः ॥
तयोरादौ समीरस्य जयं कुर्यान्नरः सदा ।
मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥
एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरं ।
सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ॥
भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ।
आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा ॥
ऊर्वोरुपरि चेद्धत्ते उभे पादतले यथा ।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनं ॥ °

About 160 *ślokas*. It ends:

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्य देहमक्तत्वं (!) पवने स्पंदतामिव ॥
अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् ।
अनाद्यनंतं महतः परं ध्रुवं तदेव शिष्यत्यमलं
निरामयमित्युपनिषत् ॥ °

105. *Bhasmajābālopanishad*, p. 981: भद्रं° ॥ ओं अथ जाबालो भुसुंडः कैलासशिखरावासमोंकारस्वरूपिणं महादेवमुमार्धकृतशेखरं सोमसूर्याग्निनयनं अमृतेंदुरविप्रभं व्याघ्रचर्मांबरधरं मृगहस्तं भस्मोद्धूलितविग्रहं तिर्यक्त्रिपुंड्ररेखाविराजमानफालप्रदेशं स्मितपूर्णपंचविधपंचाननं वीरासनारूढमप्रमेयमनाद्यनंतं निष्कलं निर्गुणं शांतं निरंजनमनामयं हुंफट्कुर्वाणं शिवनामान्यनिशमुच्चरंतं हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं चतुर्थं ब्रह्मविष्णुरुद्रातीतमेकमाशास्यं भगवंतं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य श्रीफलदलैस्तेन भस्मना च नतोत्तमांगः कृतांजलिपुटैः पप्रच्छ देहि भगवन्वेदसारमुद्धृत्य त्रिपुंड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः । किं भस्मनो द्रव्यं कानि स्थानानि °

It ends: ततश्चाप्रमादेन निवसेदप्रमादेन निवसेत्काश्यां लिंगरूपिण्यामित्युपनिषत् ॥ भद्रं ° ॥

106. *Rudrajābālopanishad,* p. 993 : आप्यायंत्विति शांतिः ॥ ओं अथ हैनं कालाग्निरुद्रं भुसुंडः पप्रछ । रुद्राक्षोत्पत्तिरुद्राक्षधारणा किं फलमिति । तं होवाच भगवान् कालाग्निरुद्रस्त्रिपुरवधार्थमहं निमीलिताक्षो भवन् तेभ्यो जलबिंदवो भूमौ पतितास्ते रुद्राक्षा जाताः सर्वानुग्रहार्थाय तेषां नामोच्चारणमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न [श]क्नोमि । तत्रैते श्लोका भवंति ।

कस्मिन् स्थितं तु किं नाम कथं वा धार्यते नरैः ।
कति भेदमुखान्यत्र कैर्मंत्रैर्धार्यते कथं ॥
दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया ।
भूमावक्षिपुटाभ्यां तु पतिता जलबिंदवः ॥ ०

It ends : ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारगमनतत्संयोगपातकेभ्यः पूतो भवति सर्वतीर्थफलमश्नुते पतितसंभाषणात्पूतो भवति पंक्तिशतसहस्रपावनो भवति । शिवसायुज्यमवाप्नोति न च पुनरावर्तते इत्युपनिषत् ॥ ०

107. *Gaṇapatyupanishad,* p. 999 : भद्रं ० ॥ ओं नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्वमसी त्वमेव केवलं कर्तासि त्वमेव्यलं (!) धर्ता त्वमेव केवलं ब्रह्म । त्वं साक्षादात्मासि । नित्यं ऋतं वच्मि सत्यं वच्मि । अवतु मां अवतु वक्तारं । अव दातारं । अव श्रोतारं । ०

It ends :

महापापात्प्रमुच्यते महादोषात्प्रमुच्यते स सर्वविद्भवति ।
स सविद्भवति (!) य एवं वेदेत्युपनिषत् ॥ ०

108. *Darśanopanishad,* in 10 sections, p. 1003 : आप्यायंत्विति शांतिः ॥

ओं दत्तात्रेयो महायोगी भगवान्भूतभावनः ।
चतुर्भुजो महाविष्णोर्योगसाम्राज्यदीक्षितः ॥
तस्य शिष्यो मुनिवरः सांकृतिर्नाम भक्तिमान् ।
पप्रछ गुरुमेकांते प्रांजलिर्विनयान्वितं ॥
भगवन् ब्रूहि मे योगं साष्टांगं सप्रपंचकं ।
येन विज्ञानमात्रेण जीवन्मुक्तो भवाम्यहं ॥
सांकृते शृणु वक्ष्यामि योगं साष्टांगदर्शनं ।
यमश्च नियमश्चैव तथैवासनमेव च ॥
प्राणायामस्तथा ब्रह्मप्रत्याहारस्ततः परं ।
धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने ॥ ०

It ends :

यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रजगत्कृत्स्नं तदा भवति निर्वृतिः ॥
येन मुक्तः स भगवान् दत्तात्रेयो महामुनिः ।
सांकृतिः स्वस्व(रू)पेण सुखमास्ति (!) विनिर्भयः ॥ आ० ॥

109. *Tārasāropanishad,* in 3 sections, p. 1019 : पूर्ण ० ॥ बृहस्पतिरुवाच याज्ञवल्क्यं । यद(नु) कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छेदेवमन्ये त इदं (!) वै कुरुक्षेत्रं देवानां देवयजनं । सर्वेषां भूतानां ब्रह्मसदनमविमुक्तं वै कुरुक्षेत्रं । देवानां देवयजनं सर्वेषां ० अयमृग्वेदः प्रथमः ॥

ओमित्येतदक्षरं परं ब्रह्म तदेवोपासितव्यं । ०
यजुर्वेदो द्वितीयः ॥

अथ हैनं भारद्वाजो याज्ञवल्क्यमुवाच । कैर्मंत्रैः परमात्मप्रीतो भवति ०

It ends with *Rigv.* I., 22, 20–1 : तद्विष्णोः परमं पदं ० विष्णोर्यत्परमं पदमित्युपनिषत् । सामवेदस्तृतीयः पादः ॥ पूर्ण ० ॥

110. *Mahāvākyopanishad,* p. 1023 : भद्रं ० ॥ ओं अथ होवाच ब्रह्मा अपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः । गुह्याद्गुह्यतरमेषा न प्राकृतायोपदेष्टव्या । सात्विकायांतर्मुखाय परिशुश्रूषवे (!) । अथ संसृतिबंधमोक्षयोर्विद्याविद्ये चक्षुषी । उपसंहृत्य विज्ञाय । अविद्यालोकांडसमो दृक् । तमोमोहशरीरप्रपंचमाब्रह्मस्थावरांतं अनंताखिलाजांडभूतं । निखिलनिगमोदितसकामकर्मव्यवहारो लोकः । नैषोंधकार अयमात्मा । ०

It ends : सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमवाप्नोतीत्युपनिषत् ॥ भद्रं ० ॥

111. *Pañcabrahmopanishad,* p. 1025 : सह ० ॥ ओं अथ पैप्पलादो भगवान् । भो किमादौ किं जातमिति सद्यो जातमिति । किं भगव इति अघोर इति । किं भगव इति वामदेव इति । किं वा पुनरिमे भगव इति तत्पुरुष इति । किं वा पुनरिमे भगव इति तत्पुरुष इति (!) । सर्वेषां दिव्यानां प्रेरयिता ईशान इति ईशानो भूतभव्यस्य सर्वेषां देवयोनीनां कति वर्णाः कति भेदाः कति शक्तयो यत्सर्वं तद्गुह्यं तस्मै नमो महादेवाय महारुद्राय प्रोवाच तस्मै भगवान्महेशः ।

गोप्याद्गोप्यतरं लोके यद्यस्ति शृणु शाकल ।
सद्योजातं मही पूषा रमा ब्रह्म त्रिवृत्स्वरं ॥ ०

It ends :

अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः ।
तेनायं हृदयं प्रोक्तं शिवः संसारमोच (!) इत्युपनिषत् ॥
सह ० ॥

112. *Prāṇāgnihotropanishad*, p. 1029 : सह ॰ ॥ ओं अथातः सर्वोपनिषत्सारं संसाराज्ञानातीतमन्नसूक्तं शारीरयज्ञं व्याख्यास्यामो यस्मिन्नेव पुरुषः शरीरे विनाप्यग्निहोत्रेण विनापि सांख्येन संसारविमुक्तिर्भवतीति । ॰ See *Āth. Up.*, p. 260 *seq.* This MS. has no sectional division.

113. *Gopāla-pūrvatāpanīyopanishad*, p. 1033 : भद्रं ॰ ॥ ओं सच्चिदानंदरूपाय ॰

It ends : तं भजेद् ओं तत्सदित्युपनिषत् ॥ भद्रं ॰ ॥

114. *Gopāla-uttaratāpanīyopanishad*, p. 1039 : भद्रं ॰ ॥ एकदारो (!) व्रजस्त्रियः सकामाः ॰

It ends : गच्छध्वं स्वालयांतिकं ॥ इत्युपनिषत् ॥ भद्रं ॰ ॥

115. *Krishṇopanishad*, p. 1047 : भद्रं ॰ ॥ ओं श्रीमहाविष्णुं सच्चिदानंदलक्षणं रामचंद्रं दृष्ट्वा सर्वांगसुंदरं मुनयो वनवासिनो विस्मिता बभूवुस्तं होचुः । नो वद्यमवतारा वै गण्यंते आलिंगामो भवंतमिति भवांतरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिंगथ । अन्ये ऽवतारास्ते हि गोपालस्त्रीश्च नो कुरु (!) अन्योन्यविग्रहं नाधार्यं तवांगस्पर्शनादिह शश्वत्स्पर्शयितास्माकं गृहामो ऌता वयं ।

रुद्रादीनां वचः श्रुत्वा प्रोवाच भगवान्स्वयं ।
अंगसंगं करिष्यामि भवद्वाक्यं करोम्यहं ॥ ॰

It ends :

तस्मान्न भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ।
भूमावुत्तारितं सर्वं वैकुंठस्वर्गवासिनामित्युपनिषत् ॥ ॰

116. *Yājñavalkyopanishad*, p. 1049 : पूर्ण ॰ ॥ ओं अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच । भगवंतसंन्यासमनुब्रूहीति । कथं संन्यासलक्षणं । स होवाच याज्ञवल्क्यः । ब्रह्मचर्यं समाप्य गृही भवेद् गृहाध्वनि भूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वाथ पुनरव्रती वा व्रती वास्नातको वा स्नातको वा उत्पन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्तद्धैके प्राजापत्यामेवेष्टिं कुर्वंत्यथ ह न कुर्यादाग्नेयामेव कुर्यादग्निर्हि प्राणः प्राणमेवैतया करोति । त्रैधातवीयामेव कुर्यादेतदेव त्रयो धातवो यद् तत्सत्वं रजस्तम इति । अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिमित्यनेन (V. *S.* III., 14 ; *Taitt. S.* I. 5, 5, 2) मंत्रेणाग्निमाजिघ्रेदेष वा अग्नेर्योनिर्यः प्राणं गच्छ स्वायोनिं (!) गच्छ स्वाहेत्य॰

It ends :

यतीनां तदुपादेयं पारहंस्यं परं पदं ।
नातः परतरं किंचिद्विद्यते मुनिपुंगवेत्युपनिषत् ॥
पूर्ण ॰ ॥

117. *Varāhopanishad*, in 5 adhyāyas, p. 1053 : सह ॰ ॥ ओं अथ ऋभुर्वै महामुनिर्देवमानेन द्वादशवत्सरं तपश्चचार । तदवसाने वराहरूपी भगवान् प्रादुरभूत् स होवाचोत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति । सो ऽवतिष्ठत्तस्मै नमस्कृत्योवाच भगवान् कामिभिर्यद्यत्कामितं तत्तत्त्वत्सकाशात् स्वप्ने॰याचे समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुरस्त्वद्रूपप्रतिपादिकां (!) ब्रह्मविद्यां ब्रूहीति होवाच तथेति स होवाच वराहरूपी भगवान् ।

चतुर्विंशति तत्वानि केचिदिच्छंति वादिनः ।
केचित् षत्त्रिंशत् (! षट् ॰ ?) तत्वानि केचित्षण्णवतीति च ॥
तेषां क्रमं प्रवक्ष्यामि सावदानमना शृणु ।
ज्ञानेंद्रियाणि पंचैव श्रोत्रत्वग्लोचनादयः ॥ ॰

It ends : स्वर्णस्तेयात्पूतो भवति । तदेतदृचाभ्युक्तं । तद्विष्णोः परमं पदं ॰ *Rigv.* I. 22, 20–21, ॰ परमं पदमित्युपनिषत् । पंचमोध्यायः ॥ सह ॰ ॥

118. *Śāṭyāyanīyopanishad*, p. 1071 : पूर्ण ॰ ॥

ओं मन एव मनुष्याणां कारणं बंधमोक्षयोः ।
बद्धाय विषयासक्तं मुक्तैर्निर्विषयं स्मृतं ॥
समासक्तं यदा चित्तं जंतोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात्तत् को न मुच्येत बंधनात् ॥
चिंतमेव (!) हि संसारस्तत्प्रयत्नेन शोधयेत् ।
यच्चित्तस्तन्मनो भवति (!) गुह्यमेतत्सनातनं ॥
नावेदविन्मनुते तं बृहंतं
नाब्रह्मवित्परमं प्रीतिधाम ।
विष्णुक्रांतं वासुदेवं विजानन्
विप्रो विप्रत्वं गच्छेत्तत्वदर्शी ॥ ॰

It ends :

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
स ब्रह्मवित्परं प्रेयादिति वेदानुशासनमित्युपनिषत् ॥
पूर्ण ॰ ॥

119. *Hayagrīvopanishad*, p. 1075 : भद्रं ॰ ॥ ओं नारदो ब्रह्माणमुपसमेत्योवाच । अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां । ययाचिरात्सर्वपापं व्यपोह्य ब्रह्मविद्यां लब्ध्वा

ऐश्वर्यवान्भवति । ब्रह्मोवाच हयग्रीव देवतान्मंत्रान्यो दि (!) वेद स श्रुतिस्मृतेतिहासपुराणानि वेद स सर्वैश्वर्यवान्भवति त एते मंत्राः ।

विश्वोत्तीर्णस्वरूपाय चिन्मयानंदरूपिणे ।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे
स्वाहा स्वाहा नमः ॥
ऋग्यजुः सामरूपाय वेदाहारणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः
स्वाहा स्वाहा नमः ॥
उद्गीथो प्रणवोद्गीथ सर्ववागीश्वरेश्वर ।
सर्ववेदमयाचिंत्य सर्वं बोधय बोधय
स्वाहा स्वाहा नमः ॥

हयग्रीवमंत्राणस्य ब्रह्मात्रिरपि सवितृभार्गव ऋषयः । गायत्रीत्रिष्टुबनुष्टुप्छंदांसि । श्रीमान्हयग्रीवः परमात्मा देवतेति ह्लोमिति बीजं । ०

It ends: ओं नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्मोमित्युपनिषत् ॥ भद्रं ० ॥

120. *Dattātreyopanishad,* p. 1079: भद्रं ० ॥ सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तन्नो ब्रूहीति भगवन्नित्युक्तः सत्यानंदचिदात्मकं सात्त्विकं मामकं धामोपास्स्वेत्याह सदा तत्त्वोहमस्मीति (!) प्रयेतत्पदंति येन ते संसारिणो भवंति नारायणेनैवं विवक्षितो ब्रह्मा विश्वरूपधरं विष्णुं नारायणं दत्तात्रेयं ध्यात्वा तद्वदति । दमिति ह्रस्वं दामिति दीर्घं तद्बीजं नाम बीजस्थं द्रामित्येकाक्षरं भवति तदेतत्तारकं भवति तदेवोपासितव्यमिति ज्ञेयं गर्भादितारणं । गायत्री छंदः सदाशिव ऋषिः दत्तात्रेयो देवता वटबीजस्थमिव दत्तबीजस्थं सर्वं जगत् ।०

It ends: तस्मात् शिष्यं भक्तं प्रतिगृह्णीयात्सो ऽनंतफलमश्नुते स जीवन्मुक्तो भवतीत्याह भगवान्नारायणो ब्रह्माणमुपनिषत् ॥ भद्रं ० ॥

121. *Gāruḍopanishad,* p. 1083: भद्रं ० ॥ ओं ॥ गारुडं ब्रह्मविद्यां प्रवक्ष्यामि यां ब्रह्मा विद्यां (!) नारदाय प्रोवाच । नारदो बृहत्सेनाय बृहत्सेन इंद्राय इंद्रो भरद्वाजाय भरद्वाजो जीवत्कामेभ्यः (!) शिष्येभ्यः प्रायच्छत् । अस्य श्रीगारुडब्रह्मविद्याया ब्रह्मा ऋषिः गायत्री छंदः श्रीभगवान्महागरुडो देवता श्रीमहागरुडप्रीत्यर्थे मम सकलविषविनाशनार्थे जपे विनियोगः । ओं नमो भगवते अंगुष्ठाभ्यां नमः । श्रीमहागरुडाय तर्जनीभ्यां स्वाहा । पक्षींद्राय मध्यमाभ्यां वौषट् । श्रीविष्णुवल्लभाय । अनामिकाभ्यां हुं । त्रैलोक्यपरिपूजिताय कनिष्ठिकाभ्यां वौषट् । उग्रभयंकरकालानलरूपाय । करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासः । भूर्भुवःसुवरोमिति दिग्बंधः । ध्यानं

स्वस्तिको दक्षिणं पादं वामपादं तु कुंचितं ।
प्रांजलीकृतदोर्युग्मं गरुडं हरिवल्लभं ॥
अनंतो वामकटको यज्ञसूत्रं तु वासुकिः ।
तक्षकः कटिसूत्रं तु हरिः कर्कोट उच्यते ॥
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामके ।
शंखः शिरः प्रदेशे तु गुलिकस्तु भुजांतरे ॥
पौंड्रकालिकनागाभ्यां चामराभ्यां सुवीजितं ।
एलापुत्रकनागाद्यैः सेव्यमानं मुदान्वितं ॥
कपिलाक्षं गरुत्मंतं सुवर्णसदृशप्रभं ।
दीर्घबाहुं बृहत्स्कंधं नागाभरणभूषितं ॥
आजानुतः सुवर्णाभमाकट्योस्तुहिनप्रभं ।
कुंकुमारुणमाकंठं शतचंद्रनिभाननं ॥
नीलाग्रं नासिकावक्त्रं सुमहच्चारुकुंडलं ।
दंष्ट्राकरालवदनं किरीटमकुटोज्ज्वलं ॥
कुंकुमारुणसर्वांगं कुंदेंदुधवलाननं ।
विष्णुवाह नमस्तुभ्यं क्षेमं कुरु सदा मम ॥
एवं ध्यायेत् त्रिसंध्यासु गरुडं नागभूषणं ।
विषं नाशयते शीघ्रं तूलराशीनिवानलः ॥

ओं ईं ओं नमो भगवते श्रीमहागरुडाय पक्षींद्राय विष्णुवल्लभाय त्रैलोक्यपरिपूजिताय । उग्रभयंकरकालानलरूपाय वज्रनखाय वज्रतुंडाय वज्रदंताय वज्रदंष्ट्राय वज्रपुच्छाय वज्रपक्षालक्षितशरीराय । ओं ईं एह्येहि श्रीमहागरुडाप्रतिहतशासनास्मिन्नाविशाविश दुष्टानां विषं दूषय दूषय । स्पृष्टानां विषं नाशय नाशय ० etc., this forming little more than one fourth of the whole. Comp. Prof. Weber's text, *Ind. Stud.* xvii. p. 161.

It ends: सर्वं जनेन मुंचति तृणेन मुंचति । काष्ठान्मुंचतीत्याह भगवान् ब्रह्मेत्युपनिषत् । भद्रं ०

122. *Kalisaṃtaraṇopanishad,* p. 1087: सह ० ॥ ओं ॥ द्वापरांते नारदो ब्रह्माणं जगाम । कथं भगवन्

गां पर्यटन् कलिं संतरेयमिति स होवाच ब्रह्मा साधु पृष्टोऽस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूलकलिर्भवति (!)। नारदः पुनः पप्रच्छ तन्नाम किमिति। स होवाच हिरण्यगर्भः।

हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥
इति षोडशकं नाम्नां कलिकल्मषनाशनं।
नातः परतरोपायः सर्ववेदेषु दृश्यते॥

इति षोडशकलावृतस्य जीवस्यावरणविनाशं संततः। प्रकाशते परब्रह्म।° about as much more.

123. *Jābālopanishad*, p. 1089 : आप्यायंत्विति शांतिः॥ ओं अथ हैनं भगवंतं जाबालिं पैप्पलादिः पप्रच्छ भगवन्मे ब्रूहि परमतत्वरहस्यं। किं तत्वं। को जीवः। कः पशुः। क ईशः। को मोक्षोपाय इति। स तं होवाच। साधु पृष्टः सर्वं निवेदयामि यदा ज्ञातमिति। पुनः स तमुवाच। कुतस्त्वया ज्ञातमिति। पुनः स तमुवाच षडाननादिति। पुनः स तमुवाच। तेनाथ कुतो ज्ञातमिति पुनः स तमुवाच। तेनेशानादिति पुनः स तमुवाच। कथं तस्मात्तेन ज्ञातमिति°

It ends : सकलरुद्रमंत्रजापी भवति। न स पुनरावर्तते° इति। ओं सत्यमित्युपनिषत्॥ आप्या°॥

124. *Saubhāgyalakshmyupanishad*, in three sections, p. 1091 : वाङ्मे°॥ अथ भगवंतं देवा ऊचुर्हे भगवन् कथय सौभाग्यलक्ष्मीविद्यां तथेत्यवोचद्भगवानादिनारायणः। सर्वे देवा यूयमावधामना(!)भूत्वा शृणुत तुरीयरूपां तुरीयातीतां सर्वोत्कटां सर्वमंत्रासनगतां पीठोपपीठदेवतापरिवृतां चतुर्भुजां श्रियं हिरण्यवर्णामिति (!) पंचदशर्ग्भिः ध्यायथ अथ पंचदशर्गात्मकस्य श्रीसूक्तस्यानंदकर्दमचिक्लीतेंदिरासुता ऋषयः। श्रीरित्याद्य ऋचश्चतुर्दशानामृचामानंदाद्यृषयः।°

It ends : स सकलधनधान्यपुत्रकलत्रहयभूगजपशुमहिषीदासीदासयोगज्ञानवान्भवति। स न पुनरावर्तत इत्युपनिषत्॥ वाङ्मे°॥

125. *Sarasvatīrahasyopanishad* (11 sections), p. 1095 : सह°॥ ओं॥ ऋषयो ह वै भगवंतमाश्वलायनं संपूज्य पप्रच्छुः।

केनोपायेन तद् ज्ञानं तदर्थावभासकं (!)।
यदुपासनया तत्वं जानासि भगवन्वद॥
सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया।
स्तुत्वा जप्त्वा परां सिद्धिमलभ्य (!) मुनिपुंगवाः॥
ऋषय ऊचुः। कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत।
महासरस्वती येन तुष्टा भगवती वद॥

स होवाचाश्वलायनः। अस्य सरस्वतीदशश्लोकमहामंत्रस्य महाश्वलायनो भगवानृषिः। अनुष्टुप् छंदः। श्रीवागीश्वरी देवता। यद्वागिति बीजं। देवीं वाचमिति शक्तिः। प्र णो देवीति कीलकं।°

It ends :

मयि जीव त्वमीशत्वं कल्पितं वस्तुतो न हि।
इति यस्तु विजानाति स मुक्तो नात्र संशय इत्युपनिषत्॥ सह°॥

126. *Bahvricopanishad*, p. 1101 : वाङ्मे°॥ ओं देवी ह्येकाग्र आसीत्। सैव जगदंडमसृजत। कामकलेति विज्ञायते। तस्या एव ब्रह्मा अजीजनत्। रुद्रो अजीजनत्। सर्वे मरुद्गणा अजीजनत्(!)। गंधर्वाप्सरसः किन्नरा वादित्रवादिनः समं तदजीजनत्। भोग्यमजीजनत्। सर्वमजीजनत्। सर्वं शाक्तमजीजनत्। अंडजं स्वेदजमुद्भिज्जं जरायुजं यत्किंचैतत् प्राणि स्थावरजंगमं मनुष्यमजीजनत्।° about twice as much more.

127. *Muktikopanishad*, p. 1103 : पूर्ण°॥ ओं॥

अयोध्यानगरे रम्ये रत्नमंटपमध्यमे।
सीताभरतसौमित्रिशत्रुघ्नाद्यैः समन्वितं॥
सनकाद्यैर्मुनिगणैर्वशिष्ठाद्यैः शुकादिभिः।
अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशं॥
धियां क्रियासहस्राणां साक्षिणं निर्विकारिणं।
स्वरूपध्याननिरतं समाधिविरमे हरिं॥
भक्त्या शुश्रूषया रामं स्तुवन्पप्रच्छ मारुतिः।
राम त्वं परमात्मासि सच्चिदानंदविग्रहः॥°

It ends :

जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते।
विशत्यदेहमुक्तत्वं पवनोऽस्पंदतामिव॥

तदेतदृचाभ्युक्तं। तद्विष्णोः परमं पदं° परमं पदं॥ ओं सत्यमित्युपनिषत्॥ पूर्ण°॥

[128. *Mahāvākyaratnāvali*, p. 1115 : श्रीमद्विश्वाधिष्ठानसद्गुरुरामचंद्राय नमः॥

ये विद्या ह्विदेहांता (!) महावाक्यार्थविग्रहः।
श्रीरामचंद्ररूपाय तस्मै भूतात्मने नमः॥

यः पूज्यो यतिभिः स्वधर्मनिरतैर्ध्यायंति ये योगिनो
येनांतं निगमांतवेद्यमनिशं यस्मै हविर्दीयते ।
यस्मात्स्थावरजंगमं समभवद् यस्यांशमात्रो वरो
यस्मिन् तेनमिदं (? तान०) प्रणौमि सततं
श्रीवासुदेवं गुरुं ॥

नत्वा श्रीवासुदेवेंद्रपारं पंके महद्वयं ।
ग्रथ्यते वै महावाक्यरत्नावलिरियं मया ॥

अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः। तत्रैकविंशतिशाखा ऋचः । नवाधिकशतशाखा यजुषः । सहस्रशाखाः साम्नः । पंचाशच्छाखा अथर्वणस्य । एकैकस्याः शाखाया एकैकोपनिषत्। आहत्याशीत्यधिकशतसहस्रसंख्याका उपनिषदः। तासु श्रीरामचंद्रेण रामदूताय सारतरोपनिषद अष्टोत्तरशतसंख्याका उपदिष्टाः। तदा च मुक्तिकोपनिषद्यष्टोत्तरशतोपनिषन्नामश्लोका * लिख्यंते ।

ईशकेनकठप्रश्नमुंडमांडूक्यतित्तिरि ।
ऐतरेयं च छांदोग्यं बृहदारण्यकं तथा ॥ १ ॥

ब्रह्मकैवल्यजाबालाः श्वेताश्वो हंस आरुणिः ।
गर्भो नारायणो हंसो बिंदु नादशिरः शिखा ॥ २ ॥

मैत्रायणी कौषीतकी बृहज्जाबालतापिनी ।
कालाग्निरुद्रो मैत्रेयी सुबालक्षुरिमंत्रिकाः ॥ ३ ॥

सर्वसारं निरालंबं रहस्यं वज्रसूचिकं ।
तेजोनादध्यानविद्यायोगतत्वात्मबोधकं ॥ ४ ॥

परिव्राट् त्रिशिखी सीता चूडा निर्वाणमंडलं ।
दक्षिणा शरभं स्कंदं महानारायणाद्वयं ॥ ५ ॥

रहस्यं रामतपनं वासुदेवं च मुद्गलं ।
शांडिल्यं पैंगलं भिक्षु महः शारीरकं शिखा ॥ ६ ॥

तुरीयातीतसंन्यासपरिव्राजाक्षमालिकाः ।
अव्यक्तैकाक्षरं पूर्णसूर्याख्यध्यात्मकुंडिकाः ॥ ७ ॥

सावित्र्यात्मपाशुपतं परं ब्रह्मावधूतकं ।
त्रिपुरातपनं देवी त्रिपुराकठभावनाः ॥ ८ ॥

हृदयं कुंडली भस्म रुद्राक्षगणदर्शनं ।
तारसारमहावाक्यं पंचब्रह्माग्निहोत्रकं ॥ ९ ॥

गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकं ।
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडं ॥ १० ॥
कलिजाबालसौभाग्यं रहस्य ऋचमुक्तिकेति !

तत्र दशोपनिषद ऋग्वेदगताः। शुक्लकृष्णभेदेन यजुर्वेकपंचाशत् । तत्र शुक्लयजुष्येकोनविंशतिः । कृष्णयजुषो द्वात्रिंशत् । साम्नां षोडश । अथर्वणस्यैकत्रिंशत् । आहत्याष्टोत्तरशतं । तत्र गौडपदाचार्यैर्माडूक्योपनिषद्व्याख्याता । श्रीमच्छंकरभगवत्पादाचार्यैर्दशोपनिषदः । पंच रुद्रान्वर (!) । नृसिंहतापिनी च शंकरानंदैः सदाशिवब्रह्मेंद्रैः स्वयंप्रकाशानंदाद्यैश्च द्वात्रिंशोपनिषदः । विद्यारण्याचार्यैरष्टोत्तरशतोपनिषद्व्याख्याता ॥ प्रकृते तु

रामचंद्रेणोपदिष्टे रामदूताय धीमते ।
ईशाद्यष्टोत्तरशतोपनिषद्यादसांपतौ (!) ॥
निमज्यात्र महावाक्यरत्नावलिरुदाहृता ।
विभाव्यते विभागेन सा त्रयोदशधा पुनः ।

तत्रादौ विधिवाक्यानि बंधमोक्षपराणि च ।
अज्ञानिनिंदावाक्यानि जगन्मिथ्यापराणि च ॥
ततोपदेशवाक्यानि जीवात्मैक्यपराणि च ।
ब्रह्मविन्मनसाख्यानि जीवन्मुक्तिपराणि च ॥
ब्रह्मानुभूतिरूपाणि स्वसमाधिपराणि च ॥
अष्ट स्वरूपवाक्यानि फलवाक्यान्यसंततं ।
विदेहमुक्तिवाक्यानि लिख्यंते निश्चितात्क्रमात् ॥
यः स्वाश्रमाचाररतः परिव्राड् विजितेंद्रियः ।
सोऽधिकारो महावाक्यरत्नावल्यां तु नेतरे ॥
वाक्पूर्णसहनाप्यायं भद्रं कर्णेभिरेव च ।
पंचशांतिः पठित्वादौ पठेद्वाक्यान्यनंतरं ॥ ०
तत्र सार्वातिकविधिवाक्यानि । ०

129. *Śvetāśvataropanishad*, in six adhyāyas, with *Vijñānātman's* commentary (*vivaraṇa*), p. 1163 : मूलं ॥ हरिः ओं ॥ ब्रह्मवादिनो वदंति ।

किं कारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च संप्रतिष्ठा ।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थां ॥ १ ॥
श्रीगुरुभ्यो नमः ॥ हरिः ओं ॥
अवच्छेदत्रयातीतनिर्मलज्ञानमूर्तये ।
मनो गिरां विदूराय दक्षिणामूर्तये नमः ॥ ०

See further on.

* On this enumeration of the *Upanishads*, and their distribution among the several Vedas, see Sir W. Elliot, *Journal of the Asiatic Society*, Bengal, 1851, p. 607 *seq.*; A. Weber, *Ind. Stud.* iii., p. 324 *seq.*

## 495.

**2783b.** Foll. 7; size 11 in. by 4½ in.; well written, in the Devanāgarī character, about A.D. 1600; 14–16 lines in a page.

*Māṇḍūkyopanishad* with the *Gauḍapādīya Kārikās*; in four *prakaraṇas*.

The 1st *prakaraṇa*, the prose (or *upanishad*) portions of which are marked in red, ends: इति माण्डूक्योपनिषत् समाप्ता ॥ the 2nd *p.*, like the rest, in *ślokas*: इति द्वितीयं वैतथ्याख्यं प्रकरणमुपनिषदं व (च?) स्मृतिं रूपं माण्डूक्योपनिषदपेक्षया द्वितीयत्वम् ॥ the 3rd *p.*: इत्यद्वैताख्यं प्रकरणं उपनिषत् ॥ the 4th *p.*: इत्यलातशान्त्याख्यं चतुर्थं प्रकरणमुपनिषत् समाप्तम् (!) ॥

Edited, with *Śaṅkarācārya's* and *Ānandagiri's* commentaries, by Dr. E. Röer, in the *Bibl. Ind.*, 1850. Translated by the same, 1853.

[COLL. OF FORT WILLIAM.]

## 496.

**1454e.** Foll. 67; size 10¼ in. by 4¼ in.; fairly written, in Devanāgarī; nine lines in a page. Modern.

*Śaṅkarācārya's* commentary on the *Māṇḍūkyopanishad* including the *Gauḍapādīya Kārikās*.

It ends: इति श्रीगोविंदभगवत्पादपूज्यशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतावागमशास्त्रविवरणे ऽलातशांत्याख्यं चतुर्थं प्रकरणं समाप्तं ॥

[H. T. COLEBROOKE.]

## 497.

**1084a.** Foll 90; size 13½ in. by 5 in.; well written, in the Devanāgarī character; twelve lines in a page.

*Ānandagiri's* gloss on *Śaṅkara's* commentary on the *Māṇḍūkyopanishad*, and the *Gauḍapādīya Kārikās*.

Dated Saṃvat 1852. [H. T. COLEBROOKE.]

## 498.

**992.** Foll. 89; size 13 in by 5 in.; legibly written, in the Devanāgarī character; 9–1[illegible] lines in a page.

Another copy of *Ānandagiri's Māṇḍūkyopanishad-bhāshyaṭīkā*.

Written in Saṃvat 1737, by one *Śivarāma* son of *Śrī Kuvera*. [H. T. COLEBROOKE.]

## 499.

**138f.** Foll. 18; size 10 in. by 4¼ in. fairly written, in the Devanāgarī character eleven lines in a page.

*Śaṅkarācārya's* commentary on the *Kenopanishad* [*Keneshitapadabhāshya*].

Dated Saṃvat 1847.

The *Kena* (*Keneshita*) or *Talavakāra-upanishad* forms part of the *Jaiminīya* (or *Talavakāra*) *Brāhmaṇa* of the *Sāmaveda*, recently discovered by Dr. Burnell. It has been edited, with *Śaṅkara's* and *Ānandagiri's* commentaries, by Dr. E. Röer, *Bibl. Ind.* 1850; translated by Rajah Rammohun Roy, 1816 (2nd ed., 1832) by Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, I. (1879).

[H. T. COLEBROOKE.]

## 500.

**138g.** Foll. 11; size and writing as the preceding MS.

*Ānandajñānagiri's* gloss on *Śaṅkarācārya's* commentary [*Talavakāropanishad-bhāshyaṭippaṇa*]. [H. T. COLEBROOKE.]

## 501.

**1095B.** Foll. 7; size 12 in. by 5½ in. legibly written, in Devanāgarī, on European paper; 14–16 lines in a page.

The same work. [H. T. COLEBROOKE.]

## 502.

**1355f.** Foll. 20; size $10\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; well written, in Devanāgarī, about A.D. 1700; fourteen lines in a page.

*a)* Another copy of *Ānandajñāna's* gloss. It ends, fol. 7:

योऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धबोधांबुधिः साक्षात्सोऽहं नित्योऽभयः प्रभुः ॥ १ ॥

इति श्रीशांकरस्य तलवकारोपनिषत्पदभाष्यटिप्पणं समाप्तं ॥ The work is marked के॰ प॰ भ॰ टी॰ in the margin.

*b) Keneshitavākya-bhāshyaṭippaṇa,* a gloss on *Śaṅkara's Kenopanishadvākyavivaraṇa,* the same as that by which the latter work is followed in the next MS.

It is marked के॰ वा॰ भा॰ टी॰ in the margin. [H. T. COLEBROOKE.]

## 503.

**964b.** Foll. 52; size $9\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; fairly written, in the Devanāgarī character; nine lines in a page. Modern.

*a) Śaṅkarācārya's Kenopanishad-vākyavivaraṇa.* It begins:

समाप्तं कर्मात्मभूतप्राणविषयं विज्ञानं कर्म चानेकप्रकारं॰ It ends, fol. 24:

इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ तलवकारोपनिषत्केनोपनिषदि वाक्यविवरणं समाप्तं ॥

*b) Keneshitavākya-bhāshyaṭippaṇa,* a gloss on the preceding work. It begins: *

प्रयत्नाद्यंतरेणैव मनआदेः प्रवर्तकं ।
विदिताविदितान्यत्वसिद्धं ब्रह्माहमद्वयं ॥

केनेषितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो व्याख्यायापि न तुतोष भगवान्भाष्यकारः शारीरकैर्न्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानैः श्रुत्यर्थसंग्राहकैर्वाक्यैर्व्याचिख्यासुः पूर्वकांडेन संबंधमभिधित्सुः पूर्वकांडार्थं संक्षेपतो दर्शयति । समाप्तमिति॰

It ends:

सत्यकामः स्वयंसिद्धः सर्वज्ञो यः स्वशक्तितः ।
स एतांतः प्रविष्टोऽस्मदुपास्यः सर्वदेहिनां ॥ १ ॥

[H. T. COLEBROOKE.]

* One or two mistakes of the scribe have been corrected with the help of MS. 1355f.

## 504.

**1317b.** Foll. 72; size 12 in. by $4\frac{1}{2}$ in.; legibly written, in the Devanāgarī character; 7–9 lines in a page. Modern.

*Kenopanishad,* with a commentary by *Bāla Krishṇānanda,* ruler of *Śrutinagara.*

The comment begins:

समाधावंभोधौ स्फुरदमृतमाधुर्यमहिते
शरद्राकाचंद्रः सकलकलिकामोदमधुरः ।
सदद्वैतानंदः शमरसमहिम्ना समरसो
विवर्तानामादिर्विविधघटनानां विजयते ॥ १ ॥
श्रुत्यंतांबुजमोदने दिनमणिश्चिंतामणिश्चिंतितः
स्वात्मानंदपुमर्थपूर्णतरसद्विश्राणने विश्रुतः ।
यो विश्रांतिसुरद्रुमो भवभवप्रोद्दामतापश्रमे
सोयं शंकरभिक्षुशेखरमणिश्चित्ते चिरं वर्ततां ॥ २
पुराणं पुण्यानामवधिर॰ ३ ॥
भगवत्पादवचनमणिदीपावलंबनात् ।
निवृत्तहृदयध्वांतः स्वात्मानमवलोकये ॥ ४ ॥
श्रीधरमार्ये श्रीमत्स्वयंप्रकाशार्यगोपालौ ।
शिवरामं पुरुषोत्तमपूर्णानंदौ च गुरुकुलं कलये ॥ ५ ॥
स्वचेतःसंशुद्धिं ननु तलवकारश्रुतिशिरो
गिरामालंबेनापनयपरिपाटीमपनयन् ।
मुहुर्बालो नम्यद्विबुधमुनिरुविद्रुतयतो
यतिः कृष्णानंदः श्रुतिनगरनेता वितनुते ॥ ६ ॥

केनेषितमित्याद्या छंदोगांतर्गतानां तलवकारिणां ब्रह्मविद्यापरोपनिषत् ॥॰

Foll. 1–13 contain the introduction.

The commentary ends: न तु साधारणजनः इत्यर्थः इतिहि विद्यासमाप्तिमवगमयति ॥ इति श्रीमत्परमहंस ॥ (!)

[H. T. COLEBROOKE.]

सत्यमेव जयते

## 505.

**583.** Foll. 17; size 11 in. by 4¼ in.; legibly written, in the Devanāgarī character, in the early part of the last century; 10–14 lines in a page.

*Śaṅkarācārya's* commentary (*bhāshya* or *vivaraṇa*) on the *Muṇḍakopanishad.*

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, in the *Bibl. Ind.*, 1850. The *upanishad* has been translated by Rajah Rammohun Roy, 1819 (2nd ed., 1832); by L. Poley (French), 1836; by Dr. E. Röer (1853); by F. M. Müller, *Sacred Books of the East*, xv. (1884).

[H. T. COLEBROOKE.]

## 506.

**1625A.** Foll 27; size 8¼ in. by 4 in.; fairly written in the Devanāgarī character, about A.D. 1650; 11–13 lines in a page.

The same work. [H. T. COLEBROOKE.]

## 507.

**1095C.** Foll. 25; size 12 in. by 4¾ in.; fairly written, in the Devanāgarī character, in the latter part of the 17th century; 10–12 lines in a page.

The same work. [H. T. COLEBROOKE.]

## 508.

**1454b.** Foll. 30; size 10¼ in. by 4 in.; fairly written, in Devanāgarī; nine lines in a page. Modern.

Another copy of *Saṅkarācārya's Muṇḍakopanishadbhāshya.* [H. T. COLEBROOKE.]

## 509.

**1454c.** Foll. 13; size 10¼ in. by 4 in.; fairly written, in Devanāgarī; eleven lines in a page. Modern.

*Ānandagiri's Muṇḍakabhāshyaṭippaṇa.*

[H. T. COLEBROOKE.]

## 510.

**1878b.** Foll. 30; size 12¼ in. by 4 in.; fairly written, in Devanāgarī; nine or ten lines in a page. Modern.

The *Muṇḍakopanishad*, with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The commentary begins:

मुंडकं मुंडभागिस्थं ब्रह्मात्मैक्यावबोधकं शंकराचार्यमार्गेणैव पदे पदे ब्रह्मविद्याया अतिदुर्लभत्वं दर्शयितुं इतिहासरूपेण श्रुतिः प्रथमतो गुरुपरंपरामाह । ब्रह्मा ब्रह्मांडजः ०

[DR. JOHN TAYLOR.]

## 511.

**1454a.** Foll. 39; size 10¼ in. by 4 in.; fairly written, in Devanāgarī; ten lines in a page. Modern.

The *Kāṭhakopanishad* with *Śaṅkarācārya's* commentary.

The commentary begins: ओं नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च ०

[H. T. COLEBROOKE.]

## 512.

**1364b.** Foll. 28; size 10½ in. by 4¾ in.; Devanāgarī character; indifferent handwriting of the earlier part of last century; twelve or thirteen lines in a page.

*Śaṅkarācārya's Kāṭhakabhāshya.*

It begins: नमो भगवते वैवस्वताय ०

[H. T. COLEBROOKE.]

## 513.

**790a.** Foll. 20; size $9\frac{3}{4}$ in. by 4 in.; legibly written, in Devanāgarī, about the middle of the last century; ten lines in a page.

The same work.

It begins: नमो वैवस्वताय ०

[H. T. Colebrooke.]

## 514.

**1457b.** Foll. 37; size 10 in. by 4 in.; clearly written, in the Devanāgarī character, in the earlier part of last century; ten lines in a page.

*Śaṅkarācārya's* commentary on the *Kāṭhaka-* or *Kaṭha (vallī)-upanishad.*

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, *Bibl. Ind.* 1850; the *Upanishad* translated by Rajah Rammohun Roy, 1832; L. Poley (French), 1835–37; Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, xv., 1884.

[H. T. Colebrooke.]

## 515.

**1878d.** Foll. 46; size $12\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; 9–11 lines in a page. Modern.

The *Kāṭhakopanishad*, with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The commentary begins:

आत्मकल्पद्रुमं नीताः शंकरेण यथा पुरा ।
कठवल्लीविवेष्यामि तथैव पदपल्लवाः ॥

अथोपनिषदां कर्मसंबंधौ विषयादिचतुष्टयं च सुलभं । ततो न पृथग्दर्शितं यं । कठश्रुत्युपनिषदारंभ आख्यायिका श्रद्धां तां स्वधर्मनिरतानां ब्रह्मज्ञानं नेतरेषामित्यर्थः ॥ उशन् ०

It ends: इति श्रीपरमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्यस्य शंकरानंदभगवतः कृतौ काठकोपनिषद्दीपिकायां द्वितीयेऽध्याये तृतीया वल्ली समाप्तश्चाध्यायः ॥

[Dr. John Taylor.]

## 516.

**810.** Foll. 283; size $14\frac{1}{2}$ in. by 5 in.; fairly written, in Devanāgarī, in the latter part of the last century; twelve lines in a page.

The *Kaṭhavallīvivaraṇa,* a commentary on the *Kaṭhopanishad,* by *Bāla Krishṇānanda Sarasvatī* ruler of *Śrutinagara* (or *Vedanagara*).

It begins:

चमत्कारः कश्चित्सकलपुरुषार्थेषु सततं
सतां हृत्पाथोजे तरुणकिरणः कोऽपि तरणिः ।
सनाथिक्षीराब्धौ मधुरतरराकाहिमकरम्
चिदानंदो भूमा चिरपरिचितः सन्विजयतां ॥ १ ॥
श्रीमच्छंकरभास्करस्य किरणैः फुल्ले वचोभिः परा
खंडार्थैकमरंदसंभृततनौ सद्युक्तिपत्रोज्वले ।
हंसो हंसरसे कठश्रुतिशिरःपद्मे वचःकेसर
चर्चामोदभरे सदैव चरितुं संसक्तमानसः ॥ २ ॥
संख्यावज्ज्ञानसंख्यया सरसया सत्यायया संख्यया
सांख्यादिप्रतिपक्षया सुदृढया ऽखंडार्थसिद्धांतया ।
आचार्यो द्रमिलो नवः श्रुतिपुरीनेता यतिर्बालकः
कृष्णानंदसरस्वती वितनुते चित्तस्य संशोधनं ॥ ३ ॥
श्रीमत्पूर्णानंदान्वंदे पुरुषोत्तमार्यांश्च ।
शिवरामयतींद्रानपि गोपालानंददेशिकेंद्रांश्च ॥ ४ ॥
श्रीमत्स्वयंप्रकाशान् श्रितजनकल्पद्रुमान् श्रये सततं ।
श्रीमच्छ्रीधरचरणांभोजं हृदये सदा कलये ॥ ५ ॥
श्रुतिनगराधीशेनाभिनवद्रविडार्यबालकृष्णेन ।
रचितेयं मोदयतात्कैलासेशं कृतिर्नेहादेवं ॥ ६ ॥
मन्नयायस्मृतिभिर्विवेचितेयं श्रुतिर्निगूढार्था ।
संतोषं निर्दोषा संपादयतात्सतां सततं ॥ ७ ॥

उशन्निराद्या मंत्रब्राह्मणमयी कठोपनिषत् ०

इति श्रीमत्परमहंसपरिव्राजकश्रुतिनगरेशस्वयंप्रकाशाभिनवद्रविडार्यबालकृष्णानंदविरचिते काठकोपनिषद्विवरणे मंत्रब्राह्मणविभजनं नाम प्रथमः परिच्छेदः fol. 8.

इति ० ब्राह्मणविवेचनं नाम द्वितीयः परिच्छेदः fol. 69.

इति ० तृतीये मंत्रपरिच्छेदे प्रथमवल्लीविवृतिः fol. 137.

इति ० कठवल्लीविवरणे तृतीयपरिच्छेदे मंत्रव्याख्याने द्वितीयवल्ली fol. 195*b*.

इति ० द्रविडार्यवेदनगरेश ० तृतीयपरिच्छेदे तृतीयवल्ली fol. 221.

इति ० तृतीये मंत्रपरिच्छेदे चतुर्थवल्ली fol. 239*b*.

इति ० तृतीयपरिच्छेदे मंत्रविवृतौ पंचमवल्ली fol. 256*b*.

The colophon of the sixth *vallī* is incomplete इति श्री· [H. T. Colebrooke.]

## 517.

**1638c.** Foll. 8; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, in the earlier part of the last century; eleven lines in a page.

*Śaṅkarācārya's* commentary on the *Īśā* (*Īśāvāsya*)- or *Vājasaneyisaṃhitā-upanishad* (the 40th adhyāya of the *Vājasaneyi-saṃhitā*).

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, *Bibl. Ind.*, 1850; the *Upanishad* translated by Rajah Rammohun Roy, 1816 (2nd ed., 1832); by Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, i., 1879.

The MS. ends:

इति श्रीगोविंद ० शंकरभगवतः कृतौ वाजसनेयसंहितोपनिषद्भाष्यं समाप्तं ॥ [H. T. Colebrooke.]

## 518.

**121A.** Foll. 12; size 10 in. by 4 in.; Devanāgarī character; indifferent handwriting; eleven lines in a page.

*Yājñīyamantra-vyākhyānavivaraṇa*, a gloss by *Jayatīrtha Bhikshu*, on (*Madhva*) *Ānandatīrtha's* commentary on the *Īśāvāsyopanishad*.

It begins:

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान्पातु नो हरिः ॥

काण्वीं मन्त्रोपनिषदं व्याकरिष्यन् भगवानाचार्यश्चिकीर्षितावि-घ्नपरिसमाप्त्यादिप्रयोजने प्रपाद्य देवतास्तुतिनतिप्रथमं निबध्नाति। नित्येति।० – – – – ज्ञानमूर्त्तये नित्यायेति।

The MS. ends:

कमलावदनांभोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य याज्ञीयमंत्रव्याख्यानस्य विवरणं जयतीर्थभीक्षुविरचितं समाप्तं।० सं १८०५ ०
[H. T. Colebrooke.]

## 519.

**1317a.** Foll. 70; size $12\frac{3}{8}$ in. by $4\frac{1}{8}$ in.; fairly written, in the Devanāgarī character, in the early part of the last century; nine lines in a page.

*Īśādhyāyabhāshya*, a commentary on the *Īśāvāsyopanishad*, by *Bāla Krishṇānanda*.

It begins:

चिदानंदो हंसश्चिरपरिचितो मानसतटे
चमत्कारान् कुर्वन् मतिमहिलयालिंगिततनुः ।
विलासाश्चिन्वानश्चरमचरमुच्चावचमिदं
विलीनीकुर्वंश्चासकृदपि परेशो विजयते ॥ १ ॥
वंदे वंदारुवृंदांतरघनतिमिरे ० वंदे शिकेंद्रं यतींद्रं ॥ २ ॥
शंकरयतिवरसूचित ० ३ ॥
अपनयतिमिरवृतायां हृदयगुहायां सदद्वयार्थाध्वै ।
श्रीमच्छंकरयतिवरवाणीमणिदीपिकायिता जयति॥४॥
पूर्णानंदयतींद्रान् पुरुषोत्तमयोगिनो ऽथ गोपालान्।
श्रीमात्स्वयंप्रकाशान् श्रीधरवर्यांश्च सततमाकलये ॥५॥
मनूनीशेत्याद्यान् विशदबृहदारण्यकगिरा
मुहुर्व्याख्यातार्थान् क्रमघटनयालोड्य विमलम् ।
यैतिर्बालो नव्यद्रविडमुनिराम्नायनगराधिभूः कृष्णानंदः स्वमतिपरिशुद्धिं वितनुते ॥ ६ ॥

ईशावास्यमित्याद्या वाजसनेयिशाखांतर्गतकाण्वमध्यंदिनयोश्चत्वारिंशत्तमाध्यायात्मिकोपनिषद् ०

It ends:

श्रीमच्छंकरयतिवरसूचितमर्यादया ऽकथयमहं ।
बृहदारण्यकगीर्भिर्भावानीशादिमंत्राणां ॥

इति श्रीमत्परमहंसपरिव्राजकश्रीस्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यश्रीमच्छ्रीधरानंदसरस्वतीचरणकमलेंदिरायितहृदयश्रुतिनगरीशाभिनवद्रविडाचार्यबालकृष्णानंदविरचितमीशाध्यायभाष्यं संपूर्णम् ॥ [H. T. Colebrooke.]

## 520.

**1095F.** Foll. 25; size 12 in. by 4¾ in.; fairly written, in Devanāgarī, in the latter part of the 17th century; 9–11 lines in a page.

*Śaṅkarācārya's* commentary on the *Praśnopanishad.*

Edited, with *Ānandagiri's* gloss, by E. Röer, *Bibl. Ind.*, 1850. The *Upanishad* translated by the same scholar, 1853: by F. M. Müller, *Sacred Books of the East*, xv., 1884.

[H. T. COLEBROOKE.]

## 521.

**1454d.** Foll. 32; size 10¼ in. by 4¼ in.; fairly written, in the Devanāgarī character; eight lines in a page.

Another copy of *Śaṅkara's Praśnopanishad-bhāshya.* Dated Saṃvat 1852.

[H. T. COLEBROOKE.]

## 522.

**2444.** Foll. 240 (from 136 to end not numbered); size 12¾ in. by 4½ in.; fairly written, in Devanāgarī, about A.D. 1750; ten lines in a page.

*Praśnopanishad-vivṛiti,* another commentary on the *Praśnopanishad,* by *Bāla Kṛishṇānanda Sarasvatī,* ruler of *Śrutinagara.*

It begins:

> शिवतीनां भूमिर्विविधघटनानां त्रिजगतां
> दधाना सामर्थ्यं सकलमपि सान्निध्यवशतः ।
> चिरायाविद्यायै चिदचिदुभयग्रंथिखनये
> चिरं चित्ते भूयाच्चिदखिलपुमर्थैककलिका ॥ १ ॥
> श्रीमच्छंकरपूर्णशारदसुधाभीशोर्वचोभिः
> करैः संफुल्ले नयसौरभेण भरिते षर्चादलैरुज्वले ।
> जीवेशोभयसामरस्य सरसे चेतो द्विरेफः
> सदा संसक्तोऽस्तु तुरीयवेदशिखरे प्रश्ने परे कैरवे ॥ २ ॥
> संख्यावज्जनसंख्यया सरसया सद्यायया ऽसंख्यया
> सांख्यादिप्रतिपक्षया सुदृढया ऽखंडार्थसिद्धांतया ।
> आचार्यो द्रमिलो नवः श्रुतिपुरीनेता यतिर्बालकः
> कृष्णानंदसरस्वती वितनुते चित्तस्य संशोधनं ॥ ३ ॥

etc., as p. 137 above; ° सततं ॥ ७ ॥

सुकेशा च भारद्वाज इत्याद्या मंत्राणां व्याख्येयरूपत्वादव्यभिचारेण ब्राह्मणानां व्याख्यानरूपत्वान्मंत्रब्राह्मणमयी प्रश्नोपनिषत् तस्या अल्पाक्षरा विवृतिरारभ्यते ॥ तत्रादौ विषयपरिशोधनाय मंत्रब्राह्मणे विभजामस्तत्रापीह मंत्राणामल्पत्वान्मंत्रानेव ब्राह्मणेभ्यः पृथक्कृत्य प्रदर्शयामः । तथा हि ।

> विश्वरूपं हरिणं जातवेदसं
> परायणं ज्योतिरेकं तपंतं ।
> सहस्ररश्मिः शतधा वर्तमानः
> प्राणः प्रजानामुदयत्येष सूर्यः ॥ १ ॥ °

पंचपादं ° २ ॥ एषोऽग्निस्तपत्येष सूर्य ° ३ ॥ ° sixteen couplets (*Praśnop.*, 1, 8; 1, 11; 2, 5 etc.; *cf.* also F. M. Müller, *Up.* Part II., *Introd.* p. xliii) ॥ अत्र द्वितीयप्रश्नस्थिता एषोऽग्निरित्याद्या नव मंत्राः प्राणस्तुतिपरा इंद्रियाद्यधिष्ठातृदेवताभिर्दृष्टाः प्रथमप्रश्नस्थौ मंत्रौ विश्वरूपं पंचपादमित्याद्यौ तृतीयप्रश्नस्थ उत्पत्तिमिति °

The commentary on the *brāhmaṇa* portion (viz., सुकेशा च भारद्वाजः) begins fol. 48*b*:

अथ पूर्वं प्रश्नोपनिषदो मंत्रा विश्वरूपमित्याद्याः षोडशापि सूचीकटाहन्यायेन स्वल्पत्वान्मूलत्वान्मंत्राणां मूलतात्पर्यानुरोधेनैव च ब्राह्मणप्रवृत्तेश्च व्याख्याताः । संप्रति व्याख्यारूपाणि सुकेशा चेत्यादीनि ब्राह्मणानि क्रमेण व्याकुर्मः । तत्र तृतीयो गुरुः स्वशिष्यान् श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति वचनार्थं मनसि निधाय सुकेशादिऋषिगणपिप्पलादसंवादरूपब्राह्मणविवृतमंत्रगणप्रतिपादितानर्थान् बोधयितुं पिप्पलादं प्रति सुकेशादिऋषीणां षण्णां तत्सहचरितानामन्येषां चोपसदनादिक्रियां स्वशिष्याणामन्येषां च शिक्षायै स्ववचनतो निबध्नाति स्म सुकेशेत्यादिना °

*Praśna* I. ends fol. 87*b*.

*P.* II., fol. 99*b*: इदं च तमेता इति वाक्यं [viz., after II., 4 of the edition (5–13 having been explained as *mantras*)] पिप्पलशाखागतप्रश्नोपनिषदि न पठितं शौनकीयप्रश्न एव पठितमिति विशेषो वेदितव्य इति सर्वं निराकृतं ॥

*P.* III., fol. 146; IV., fol. 167*b*; V., fol. 181*b*; VI., fol. 196.

Then follows an additional philosophical chapter, beginning:

**अथ भगवान् बादरायणो ऽस्मामुपनिषदि संदिग्धार्थकं वाक्यं विवरीतुं प्रथमे ऽध्याये तृतीये पादे । ईक्षतिकर्मव्यपदेशात् स इति (I. 3, 13) तत्रैव पादे । अत्ताचराचरग्रहणात् प्रकरणाच्चेति च सूत्रयां चकार । तत्र प्रथममीक्षतिकर्मव्यपदेशात्स इत्यधिकरणं ०**

It ends:

**ननु श्रीमच्छंकरभगवत्पादभट्टभास्करलक्ष्मणार्यभिक्षुप्रभृतिभिः कठश्रुतिमुदाहृत्यैतदधिकरणप्रवर्तनादानंदतीर्थैरदितिश्रुत्यवलंबेन प्रवर्तनात् प्राकृतं सूत्रयोजनं तद्विरुद्धमिति चेत् नैव विरुद्धं प्रश्नश्रुतौ विस्पष्टमत्तृपदश्रवणादर्थावाधाच्च (!) प्रकृतात्तृसूत्रविषयतायाः समुचितत्वात् कठादिश्रुतावत्तृपदश्रवणाभावे न यथा कथंचिदत्तृपदस्यानुमेयत्वेनार्थप्रत्यभिज्ञामात्रेण गौणविषयताया एव कठादिश्रुतेरुचितत्वात् प्रायेण सर्वेष्वष्टाधिकरणेषु प्रथमे ऽध्याये श्रुतिशब्दानुवादेनैव सूत्रविरचनात् सूत्रगताशब्दवत्या एव श्रुतेर्मुख्यविषयत्वादर्थसाम्यवत्याः श्रुतेर्गौणविषयत्वेनैव सर्वैरभ्युपगमात् प्रश्नश्रुतिर्मुख्यो विषयः कठश्रुत्यादिर्गौणो विषय इति विभागेन प्रकृतिविरोधो नावतरत्येव गौणविषयवाक्यानुरोधेन विचारास्तु प्राक्तनाचार्यप्रवर्तिताः कठविवरणे ऽनुसंधेया इति दिक् ॥**

None of the chapters have a colophon to them; sufficient blank space having, however, been left for it after each. [H. T. COLEBROOKE.]

## 523.

**2346c.** Foll. 3; size 10 in. by 6 in.; well written, in Devanāgarī, in the latter part of last century; nine lines in a page.

*Kaivalyopanishad.*

It begins: **अथाश्वलायनो भगवंतं परमेष्ठिनमुपसमेत्योवाचाधीहि भगवन्ब्रह्मविद्यां वरिष्ठां ०** [GAIKAWAR.]

## 524.

**1878a.** Foll. 50; size 12¼ in. by 4 in.; well written, in the Devanāgarī character; ten lines in a page. Modern.

*Kaushītaki-brāhmaṇopanishad*, with the commentary (*dīpikā*) of *Śaṅkarānanda*, disciple of *Ācārya Ānandātman.*

Edited, with a translation of the *Upanishad*, by E. B. Cowell, *Bibl. Ind.*, 1861; the *Upanishad* again translated by F. M. Müller, *Sacred Books of the East*, i., 1879. [DR. JOHN TAYLOR.]

## 525.

**1878e.** Foll. 44; size 12¼ in. by 4 in.; legibly written, in Devanāgarī; 10–13 lines in page. Modern.

*Śvetāśvataropanishad* with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The *Upanishad* begins:

**ब्रह्मवादिनो वदंति । किं कारणं ब्रह्म ०**

The commentary begins:

**श्वेताश्वतरमंत्राणां ब्रह्मार्थोपनिषद्गिरां ।**
**पुण्यकृत्पुण्यतीर्थानामर्थमाविष्करोम्यहं ॥**

**ब्रह्मात्मैक्यार्थस्यातिगहनतां दर्शयितुं प्रथमतो ब्रह्मविदां विचारमवतारयति । ब्रह्मवादिनो ०**

The *Upanishad* has been edited, with *Śaṅkarācārya's* commentary, and a translation, by E. Röer, *Bibl. Ind.*, 1850–53; also translated by F. M. Müller, *Sacred Books of the East*, xv., 1884. [DR. J. TAYLOR.]

## 526.

**1133.** Foll. 64; size 11¾ in. by 6 in.; fairly written, in Devanāgarī, towards the end of the 17th century. Twelve lines in a page. The Manuscript has suffered from damp.

*Śvetāśvataropanishad* with the commentary (*vivaraṇa*) of *Vijñānātman*, disciple of *Jñānottamācārya.*

The commentary begins:

अवच्छेदत्रयातीतनिर्मलज्ञानमूर्तये ।
नमो गिरां विदूराय दक्षिणामूर्तये नमः ॥
निगमांतप्रदीपाय निःसंगसुखसंविदे ।
संसारतापनोदाय विद्याश्रीपतये नमः ॥
प्रत्यस्ताखिलभेदाय जगद्विभ्रमसाक्षिणे ।
ज्ञानोत्तमसुनींद्राय नमः प्रत्यक्सुखात्मने ॥

नमः परमऋषिभ्यो नमो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । इदं ब्राह्मणवाक्यं वादिनो वदनशीलाः * वेदार्थविपरीतपक्षान्निर्मूलीकृत्य वेदार्थतत्वेन ब्रह्मवदनशीलाः साक्षाद्वा परंपरया वा सर्ववेदार्थत्वेन ब्रह्म वदंतीत्येतत्सर्ववेदा यत्पदमामनंतीति श्रुतेः ।°

It ends:

द्विवचनमध्यायपरिसमाप्तिद्योतनार्थमादरार्थं च ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यश्रीमद्विज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे (!) षष्ठोऽध्यायः ॥

[H. T. Colebrooke.]

## 527.

**1625D.** Foll. 12; size 8½ in. by 3½ in.; legibly written, in the Devanāgarī character, about A.D. 1650; ten or eleven lines in a page.

*Mahopanishad* of the *Atharvaveda*, consisting of six sections (*upanishads*, or *upanishatkandikās*), the first five of which (according to this MS.) constitute the *Sundarītāpanī*, while the sixth is called the *Tripura-upanishad*.

I. The *Sundarītāpanī* begins: †

